Vyaptipañcakam

# व्याप्तिपञ्चकम् ।

शिरोमणिटीका + माथुरीटीका + जागदीशीटीका +

गादाधरीटीका-समलङ्कृतम् ।

---

पण्डितकुलपतिना

वि, ए, उपाधिधारिणा

श्रीजीवानन्द विद्यासागरभट्टाचार्य्येण

सङ्कलित-फक्किकासमुद्भासितम् ।

तेनैव संस्कृतं प्रकाशितञ्च ।

Ed. Sri Jīvānanda Vidyāsāgara Bhattacharyya

तृतीयसंस्करणम् ।

3rd edition


कलिकातानगर्य्याम्

गोवर्द्धनयन्त्रे

मुद्रितम् ।

इं १९०७ ।

Calcutta Govardhana Press 1907

Library IIAS, Shimla
00023863

প্রকাশক—শ্রীজীবানন্দ বিদ্যাসাগর বি, এ,
২ নং রমানাথ মজুম্‌দারের ষ্ট্রীট, কলিকাতা।

প্রিণ্টার—শ্রীগোবর্দ্ধন পান,
৪৩ নং কটন্ ষ্ট্রীট, কলিকাতা।

S
181.43
B469 V

73.
Indian Institute of Advanced Study
Acc. No 23863
Date 20.3.68

23-128

नम्बर १०.
(हेत्वाभास-लक्षण-)
बुद्धिवार.

# अथ व्याप्तिपञ्चकम्।

ननु अनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः? न तावदव्यभिचरितत्वं, तद्धि न साध्याभाववदवृत्तित्वम्, साध्यवद्भिन्नसाध्याभाववदवृत्तित्वं, साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यं, सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वं, साध्यवदन्यावृत्तित्वं वा केवलान्वयिनि अभावात्।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानखण्डे व्याप्तिवादे व्याप्तिपञ्चकम्।

समारब्धानुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादननिदानं व्याप्तिस्वरूपनिरूपणम् आरभते ननु इत्यादिना। साध्याभाववदवृत्तित्वस्याव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिमाशङ्क्याह साध्यवद्भिन्नेति। साध्यवद्भिन्ने यः साध्याभावस्तद्वदवृत्तित्वमर्थः कर्मादौ संयोगाद्यभावस्य भिन्नत्वे मानाभावादाह साध्यवदिति। हेतोः साध्यवत्पक्षभिन्नदृष्टान्तवृत्तित्वेन अव्याप्तेराह सकलेति। साकल्यं साध्याभाववति साध्ये च

बोध्यम्, साध्याभावो वा साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको ग्राह्यस्तेन विपक्षैकदेशनिष्ठाभावप्रतियोगिनि व्यभिचारिणि नातिव्याप्तिः न वा नानाव्यक्तिसाध्यकसद्धेतावव्याप्तिः अव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिसद्धेतावव्याप्तेर्व्यभिचारिणि चाव्याप्यवृत्तावतिव्याप्तेर्वारणाय अभावद्वये प्रतियोगिव्यधिकरणत्वं बोध्यं हेत्वभावोऽपि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणः तत्प्रतियोगित्वञ्च हेतुतावच्छेदकरूपेण बोध्यं तेन द्रव्यत्वादौ साध्ये विशिष्टसत्तादौ नाव्याप्तिः न वा विशिष्टसत्तात्वादिना तादृशाभावप्रतियोगिनि सत्तादौ अतिप्रसङ्गः यत्र एकव्यक्तिकं साध्यं विपक्षो वा तत्र निर्धूमत्वादिव्याप्ये तत्त्वेन साध्ये निर्वह्नित्वादौ चाव्याप्तिस्तत्र हेत्वभावस्य वह्न्यादेः प्रत्येकं यावद्विपक्षावृत्तित्वादत आह साध्यवदिति। अत्र अन्योन्याभावस्य साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यम् न हि भवति नीलो घटो घटादन्य इति।

इति श्रीरघुनाथशिरोमणिकृता व्याप्तिपञ्चकव्याख्या समाप्ता।

—•—

# अथ श्रीमथुरानाथकृतं व्याप्तिपञ्चकरहस्यम्।

अनुमानप्रामाण्यं निरूप्य व्याप्तिस्वरूपनिरूपणमारभते, 'ननु इत्यादिना' "अनुमितिहेतु" इत्यस्य अनुमाननिष्ठप्रामाण्यानुमितिहेतु इत्यर्थः, "व्याप्तिज्ञान" इत्यत्र च विषयत्वं सप्तम्यर्थः, तथा चानुमाननिष्ठप्रामाण्यानुमितिहेतुव्याप्तिज्ञानविषयीभूता व्याप्तिः का इत्यर्थः, अनुमाननिष्ठप्रामाण्यानुमितिहेत्वित्यनेन व्याप्तेरनुमानप्रामाण्योपपादकत्वकथनादनुमानप्रामाण्यनिरूपणानन्तरं व्याप्तिनिरूपणे उपोद्घात एव सङ्गतिः सूचिता। उपपादकत्वञ्च अत्र ज्ञापकत्वम्।

केचित्तु अनुमितिपदम् अनुमितिनिष्ठेतरभेदानुमितिपरम्, तथा चानुमितिनिष्ठेतरभेदानुमितौ यो हेतुः प्रागुक्तव्याप्तिप्रकारकपक्षधर्मताज्ञानजन्यत्वरूपः, तद्घटकं यद्व्याप्तिज्ञानं तदंशे विशेषणीभूता व्याप्तिः का इत्यर्थः, घटकत्वार्थकसप्तम्या तत्पुरुषसमासात् तथा च प्रागुक्तानुमितिलक्षणोपोद्घात एव सङ्गतिः अनेन सूचिता इत्याहुः।

"न तावदिति"। 'तावत्' वाक्यालङ्कारे, 'अव्यभिचरितत्वपदप्रतिपाद्यं, तत्र हेतुमाह, "तद्धीत्यादि" 'हि' यस्मात्, 'तत्' अव्यभिचरितत्वपदप्रतिपाद्यम्, 'नेति', सर्वस्मिन्नेव लक्षणे सम्बध्यते, तथा च व्याप्तिर्यतः साध्याभाववदवृत्तित्वादिरूपाव्यभिचरितत्वशब्दप्रतिपाद्यस्वरूपा न, अतोऽव्यभिचरितत्वशब्दप्रतिपाद्यस्वरूपा न इत्यर्थः पर्य्यवसितः, विशेषाभावकूटस्य सामान्याभावहेतुता च प्रसिद्धा एवेति, अतः एतन्नञ्द्वयोपादानं न निरर्थकम्। साध्याभाववदवृत्तित्वमिति, 'वृत्तम्' वृत्तिः, भावे निष्ठाप्रत्ययात्, वृत्तस्याभावः 'अवृत्तम्' वृत्त्यभाव इति यावत्, साध्याभाववतोऽवृत्तं 'साध्याभाववदवृत्तम्' साध्याभाववद्वृत्त्यभाव इति यावत्, तद्यत्रास्ति स साध्याभाववदवृत्ती

मत्वर्थीयेनप्रत्ययात्, तस्य भावः 'साध्याभाववदवृत्तित्वम्' तथा च साध्याभाववद्वृत्त्यभाववत्त्वमिति फलितमिति प्राञ्चः । तदसत् न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेदर्थप्रतिपत्तिकर इत्यनुशासनविरोधात् तत्र कर्मधारयपदस्य बहुव्रीहीतरसमासपरत्वात्, तच्च अगुणवत्त्वमिति साधर्म्यव्याख्यानावसरे गुणप्रकाशरहस्ये तद्दीधितिरहस्ये च स्फुटम् । अव्ययीभावसमासोत्तरपदार्थेन समं तत्समासानिविष्टपदार्थान्तरान्वयस्याव्युत्पन्नत्वात् यथा भूतलोपकुम्भं भूतलघटमित्यादौ भूतलवृत्तिघट-समीपतदत्यन्ताभावयोः अप्रतीतेः । एतेन वृत्तेरभावोऽवृत्तीत्यव्ययीभावानन्तरं साध्याभाववतोऽवृत्तिः यत्रेति बहुव्रीहिरित्यपि प्रत्युक्तं वृत्तौ साध्याभाववतोऽनन्वयापत्तेः । अव्ययीभावसमासस्याव्ययतया तेन समं समासान्तरासम्भवाच्च, नञुपाध्यादिरूपाव्ययविशेषाणामेव समस्यमानत्वेन परिगणितत्वात् । वस्तुतस्तु साध्याभाववतो न वृत्तिः यत्र इति त्रिपदव्यधिकरणबहुव्रीह्युत्तरं त्वप्रत्ययः । साध्याभाववत इत्यत्र निरूपितत्वं षष्ठ्यर्थः, अन्वयश्चास्य वृत्तौ, तथा च साध्याभावाधिकरणनिरूपितवृत्त्यभाववत्त्वम् अव्यभिचरितत्वमिति फलितम् । न च व्यधिकरणबहुव्रीहिः सर्वत्र असाधुरिति वाच्यम् ? अयं हेतुः साध्याभाववदवृत्तिरित्यादौ व्यधिकरणबहुव्रीहिं विना गत्यन्तराभावेन अत्रापि व्यधिकरणबहुव्रीहेः साधुत्वात् । साध्याभावाधिकरणवृत्त्यभावश्च तादृशवृत्तित्वसामान्याभावो बोध्यः । तेन धूमवान् वह्नेरित्यादौ धूमाभाववज्जलह्रदादिवृत्त्यभावस्य धूमाभाववद्वृत्तित्वजलत्वोभयत्वावच्छिन्नाभावस्य च वह्नौ सत्त्वेऽपि न अतिव्याप्तिः । साध्याभाववद्वृत्तिश्च हेतुतावच्छेदकसम्बन्धेन विवक्षणीया, तेन वह्न्यभाववति धूमावयवे जलह्रदादौ च समवायेन कालिकविशेषणतादिना च धूमस्य वृत्तावपि न क्षतिः ।

साध्याभावस्य साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताको बोध्यः। तेन वह्निमान् धूमादित्यादौ समवायादिसम्बन्धेन वह्निसामान्याभाववति संयोगसम्बन्धेन, तत्तद्वह्नित्ववह्निजलोभयत्वाद्यवच्छिन्नाभाववति च पर्वतादौ संयोगेन धूमस्य वृत्तावपि न क्षतिः। ननु तथापि गुणत्ववान् ज्ञानत्वात् सत्त्ववान् जातेरित्यादौ विषयित्वाव्याप्यत्वादिसम्बन्धेन तादृशसाध्याभाववति ज्ञानादौ ज्ञानत्वजात्यादेर्वर्त्तमानत्वात् अव्याप्तिः। न च साध्याभावाधिकरणत्वम् अभावीयविशेषणताविशेषसम्बन्धेन विवक्षितमिति वाच्यम्? तथा सति घटत्वात्यन्ताभाववान् घटान्योऽन्याभाववान् वा पटत्वादित्यादौ साध्याभावस्य घटत्वादेर्विशेषणताविशेषसम्बन्धेनाधिकरणस्य अप्रसिद्ध्या व्याप्तेरिति चेत्? न, साध्यतावच्छेदकसम्बन्धावच्छिन्नस्य अत्यन्ताभावान्योऽन्याभावयोरत्यन्ताभावस्य सप्तमपदार्थस्वरूपत्वात् अत्यन्ताभावान्योऽन्याभावयोरत्यन्ताभावस्य प्रतियोग्यादिस्वरूपत्वनये तु साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेन साध्याभावाधिकरणत्वं वक्तव्यम्। इत्थञ्च प्रतियोगिताविशेषणं, तादृशसम्बन्धश्च वह्निमान् धूमादित्यादिभावसाध्यकस्थले विशेषणताविशेष एव, घटत्वाभाववान् पटत्वादित्याद्यभावसाध्यकस्थले तु समवायादिरेव। समवायविषयित्वादिसम्बन्धेन प्रमेयादिसाध्यके ज्ञानत्वादिहेतौ साध्यतावच्छेदकसमवायादिसम्बन्धावच्छिन्नप्रमेयाद्यभावस्य कालिकादिसम्बन्धेन योऽभावः सोऽपि प्रमेयतया साध्यान्तर्गतस्तदीयप्रतियोगितावच्छेदककालिकादिसम्बन्धेन साध्याभावाधिकरणे ज्ञानत्वादेर्वृत्तेरव्याप्तिवारणाय सामान्यपदोपादानम्। साध्यसामान्यीयत्वञ्च यावत् साध्यनिरूपितत्वं स्वानिरूपकसाध्यक-

भिन्नत्वमिति यावत् । अस्यैकोक्तिमात्रतया गौरवस्यादोषत्वात् अनुमिति कारणतावच्छेदके च भावसाध्यकस्थले अभावीयविशेषणताविशेषेण साध्याभावाधिकरणत्वम् अभावसाध्यकस्थले च यथायथं समवायादिसम्बन्धेन साध्याभावाधिकरणत्वमुपादेयं, साध्यभेदेन कार्य्यकारणभावभेदात् । न च तथापि घटान्योन्याभाववान् पटत्वादित्यत्रान्योन्याभावसाध्यकस्थले घटत्वादिरूपे साध्याभावे न साध्यप्रतियोगित्वं, न वा समवायादिसम्बन्धस्तदवच्छेदकः तादात्म्यस्यैव तदवच्छेदकत्वादित्यव्याप्तिस्तदवस्थेति वाच्यम् । अत्यन्ताभावाभावस्य प्रतियोगिरूपत्वेन घटभेदस्य घटभेदात्यन्ताभावत्वावच्छिन्नप्रतियोगिताकाभावरूपतया घटभेदात्यन्ताभावरूपस्य घटभेदप्रतियोगितावच्छेदकीभूतघटत्वस्यापि समवायसम्बन्धेन घटभेदप्रतियोगित्वात् । न चान्यत्रात्यन्ताभावाभावस्य प्रतियोगिरूपत्वेऽपि घटादिभेदात्यन्ताभावत्वावच्छिन्नाभावो न घटादिभेदस्वरूपः, किन्तु तत्प्रतियोगितावच्छेदकीभूतघटत्वात्यन्ताभावस्वरूप एवेति सिद्धान्त इति वाच्यम् । यथा हि घटत्वावच्छिन्नघटवत्ताग्रहे घटात्यन्ताभावाग्रहात् घटात्यन्ताभावाभावव्यवहाराच्च घटात्यन्ताभावाभावो घटस्वरूपः तथा घटभेदवत्ताग्रहे घटभेदात्यन्ताभावाग्रहात् घटभेदात्यन्ताभावाभावव्यवहाराच्च घटभेद एव तदत्यन्ताभावत्वावच्छिन्नप्रतियोगिताकाभाव इति तत्सिद्धान्तः न युक्तिसहः । विनिगमकाभावेनापि घटत्वत्वावच्छिन्नप्रतियोगिताकात्यन्ताभाववद्घटभेदस्यापि घटभेदात्यन्ताभावाभावत्वसिद्धेरप्रत्यूहत्वाच्च । अत एव तादृशसिद्धान्तो न उपाध्यायसम्मतः । अत एव च अभावविरहात्मत्वं वस्तुनः प्रतियोगितेत्याचार्य्याः । अन्यथा घटभेदात्यन्ताभावप्रतियोगिनि घटभेदे तल्लक्षणाव्याप्त्यापत्तेः अन्योन्याभावप्रतियोगितावच्छेदकघटत्वात्यन्ताभावे तल्लक्षणस्या-

तिव्याप्यापत्तेश्च*। न चैवं घटत्वत्वावच्छिन्नप्रतियोगिताकघटत्वात्यन्ताभावस्यापि घटभेदस्वरूपत्वापत्तिरिति वाच्यम्। तदत्यन्ताभावत्वावच्छिन्नप्रतियोगिताकाभावस्यैव तत्स्वरूपत्वाभ्युपगमात् तद्वत्ताग्रहे तादृशतदत्यन्ताभावाभावस्यैव व्यवहारात्। उपाध्यायैर्घटत्वत्वावच्छिन्न-प्रतियोगिताकघटत्वात्यन्ताभावस्यापि घटभेदस्वरूपत्वाभ्युपगमाच्च। न चैवं साध्यसामान्यीयप्रतियोगितावच्छेदकसम्बन्धेनैव साध्याभावाधिकरणत्वं विवक्ष्यतां किं साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्याभाववृत्तित्वस्य प्रतियोगिताविशेषणत्वेनेति वाच्यम्। कालिकसम्बन्धावच्छिन्नात्मत्वप्रकारकप्रमाविशेष्यत्वाभावस्य विशेषणताविशेषेण साध्यत्वे आत्मत्वादिहेतावव्याप्त्यापत्तेः। कालिकसम्बन्धावच्छिन्नसाध्याभावस्य विशेषणताविशेषेण सम्बन्धेन योऽभावस्तस्यापि साध्यस्वरूपतया कालिकसम्बन्धवद्विशेषणताविशेषोऽपि साध्यीयप्रतियोगितावच्छेदकसम्बन्धस्तेन सम्बन्धेनात्मत्वप्रकारकप्रमाविशेष्यत्वरूपसाध्याभाववति आत्मनि हेतोरात्मत्वस्य वृत्तेः। प्रतियोगितावच्छेदकवत् प्रतियोग्यपि अन्योन्याभावाभावः तेन तादात्म्यसम्बन्धेन साध्यतायां साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्याभाववृत्तिसाध्यसामान्यीयप्रतियोगित्वस्य नाप्रसिद्धिः। इत्थञ्च अत्यन्ताभावत्वनिरूपितत्वेनापि साध्यसामान्यीयप्रतियोगिता विशेषणीया। अन्यथा घटान्योन्याभाववान् घटत्वत्वादित्यादौ अव्याप्त्यापत्तेः, तादात्म्यसम्बन्धस्यापि साध्याभाववृत्तिसाध्यीयप्रतियोगितावच्छेदकत्वात्। यद्वा साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्याभाववृत्तिसाध्यसामान्यीयनिरुक्त-प्रतियोगित्वतदवच्छेदकत्वान्यतरावच्छेदकसम्बन्धेनैव साध्याभावाधिकरणत्वं विव-

---

* अन्योन्याभावप्रतियोगितावच्छेदकौ तल्लक्षणस्यापि घटभेदात्यन्ताभावत्वसिद्धान्ततिव्याप्त्यापत्तेश्च इत्यपि क्वचित् पाठः।

क्षणीयं, वृत्त्यन्तमन्यतरविशेषणम् । एवञ्च घटान्योन्याभाववान् घटत्वादित्यादौ साध्याभावस्य घटत्वादेः साध्यीयप्रतियोगित्वविरहेऽपि न क्षतिः तादृशान्यतरस्य साध्यीयप्रतियोगितावच्छेदकत्वस्यैव तत्र सत्त्वात् । न च तथापि कपिसंयोगी एतद्वृक्षत्वादित्याद्यव्याप्यवृत्तिसाध्यकसद्धेतौ अव्याप्तिरिति वाच्यम् ? निरुक्तसाध्याभावत्वविशिष्टनिरूपिता या निरुक्तसम्बन्धसंसर्गकनिरवच्छिन्नाधिकरणता तदाश्रया वृत्तित्वस्य विवक्षितत्वात् । गुणकर्मान्यत्वविशिष्टसत्त्वाभाववान् गुणत्वादित्यादौ सत्त्वात्मकसाध्याभावाधिकरणत्वस्य गुणादिवृत्तित्वेऽपि साध्याभावत्वविशिष्टनिरूपिताधिकरणत्वस्य गुणाद्यवृत्तित्वान्नाव्याप्तिः न चैवं कपिसंयोगाभाववान् सत्त्वात् इत्यादौ निरवच्छिन्नसाध्याभावाधिकरणत्वाप्रसिद्ध्या अव्याप्तिरिति वाच्यम् ? केवलान्वयिनि अभावादित्यनेन ग्रन्थकृतैवास्य दोषस्य वक्ष्यमाणत्वात् । न च तथापि कपिसंयोगिभिन्नं गुणत्वादित्यादौ निरवच्छिन्नसाध्याभावाधिकरणत्वाप्रसिद्ध्या अव्याप्तिः अन्योन्याभावस्य व्याप्यवृत्तित्वनियमवादिनये तस्य केवलान्वय्यनन्तर्गतत्वादिति वाच्यम् ? अन्योन्याभावस्य व्याप्यवृत्तितानियमवादिनये अन्योन्याभावान्तरात्यन्ताभावस्य प्रतियोगितावच्छेदकस्वरूपत्वेऽपि अव्याप्यवृत्तिमदन्योन्याभावाभावस्य व्याप्यवृत्तिस्वरूपस्यातिरिक्तस्याभ्युपगमात् तच्च अग्रे स्फुटीभविष्यति ।

ननु तथापि समवायादिना गगनादिहेतुके इदं वह्निमद्गगनादित्यादावतिव्याप्तिः वह्न्यभाववति हेतुतावच्छेदकसमवायादिसम्बन्धेन गगनादेरवृत्तेः । न च तल्लक्ष्यमेव हेतुतावच्छेदकसम्बन्धेन पक्षधर्मत्वाभावाच्चासद्धेतुत्वव्यवहार इति वाच्यम् ? तत्रापि व्याप्तिभ्रमेणैवानुमितेरनुभवसिद्धत्वात्, अन्यथा धूमवान् वह्नेरित्यादेरपि लक्ष्यत्वस्य सुवचत्वात् । एवं द्रव्यं गुणकर्मा-

न्यत्वविशिष्टसत्वादित्यादावव्याप्तिः विशिष्टसत्त्वस्य केवलसत्त्वा-
नतिरेकितया द्रव्यत्वाभाववत्यपि गुणादौ तस्य वृत्तेः गुणे गुण-
कर्मान्यत्वविशिष्टसत्तेति प्रतीतेः सर्वसिद्धत्वात्। सत्तावान्
द्रव्यत्वादित्यादावव्याप्तिश्च सत्ताभाववति सामान्यादौ हेतुताव-
च्छेदकसमवायसम्बन्धेन वृत्तेरप्रसिद्धेरिति चेत्? न। हेतुता-
वच्छेदकावच्छिन्नहेत्वधिकरणता-प्रतियोगिक-हेतुतावच्छेदक-
सम्बन्धावच्छिन्नाधेयतानिरूपितविशेषणताविशेषसम्बन्धेन निरुक्त
साध्याभावत्वविशिष्टनिरूपितनिरुक्तसम्बन्ध-संसर्गकनिरवच्छिन्ना
धिकरणताश्रयवृत्तित्वसामान्याभावस्य विवक्षितत्वात् वृत्तित्वञ्च
न हेतुतावच्छेदकसम्बन्धेन विवक्षणीयम्। अस्ति च सत्तावान्
द्रव्यत्वादित्यादौ सत्ताभावाधिकरणताश्रयवृत्तित्वस्य हेतुताव
च्छेदकसमवाय-सम्बन्धावच्छिन्नाधेयतानिरूपितविशेषणताविशेष
सम्बन्धेन सामान्याभावो द्रव्यत्वादौ, समवायसम्बन्धावच्छिन्ना
धेयतानिरूपितविशेषणताविशेषसम्बन्धावच्छिन्नप्रतियोगिताकस
त्ताभावाधिकरणत्वाश्रयवृत्तित्वाभावस्य व्यधिकरणसम्बन्धाव
च्छिन्नप्रतियोगिताकाभावतया संयोगसम्बन्धावच्छिन्नगुणाभावा
देरिव केवलान्वयित्वात्। द्रव्यं सत्वादित्यादौ च द्रव्यत्वाभावा-
धिकरणगुणादिवृत्तित्वस्यैव समवायसम्बन्धावच्छिन्नाधेयता-
निरूपितविशेषणतासम्बन्धेन सत्तायां सत्त्वान्नातिव्याप्तिः। द्रव्यं
विशिष्टसत्त्वादित्यादावव्याप्तिवारणाय प्रतियोगिकान्तमाधेयता-
विशेषणम्। वस्तुतस्तु एतल्लक्षणकर्तृमते विशिष्टसत्त्वं विशिष्ट-
निरूपिताधारतासम्बन्धे नैव द्रव्यत्वव्याप्यं नतु समवायसम्बन्धेन
तथाच प्रतियोगिकान्तमाधेयताविशेषणमनुपादेयमेव। तदुप-
दाने हेतुतावच्छेदकभेदेन कार्य्यकारणभावभेदापत्तेः। हेतु-
तावच्छेदकसम्बन्धेन सम्बन्धित्वे सति इत्यनेनापि विशेषणा-
द्वह्निमान् गगनादित्यादौ नातिव्याप्तिः। ननु तथापि उभयत्व-

मुभयत्रैव पर्य्याप्तं न तु एकत्रेति सिद्धान्तादरे घटत्ववान् घटत्व-तदभाववदुभयत्वादित्यादौ पर्य्याप्त्याख्यसम्बन्धेन हेतुत्वेऽति-व्याप्तिः घटत्वाभाववति हेतुतावच्छेदकपर्य्याप्त्याख्यसम्बन्धेन हेतोरवृत्तेः । घटो न घटपटोभयमितिवत् घटत्वाभाववति न घटत्वतदभाववदुभयमित्यपि प्रतीतेरिति चेत् ? न । तादृश-सिद्धान्तादरे हेतुतावच्छेदकसम्बन्धेन साध्यसमानाधिकरणत्वे सतीत्यनेनैव विशेषणीयत्वादिति । अतएव निविशतां वा वृत्तिमत्त्वं साध्यसामानाधिकरण्यं वेति केवलान्वयिग्रन्थे दीधितिकृतः । तद्विशेषणात् वह्निमद्गगनात् इत्यादौ न अति-व्याप्तिः ।

केचित्तु निरुक्तसाध्याभावत्वविशिष्टनिरूपिता या विशेषण-ताविशेषसम्बन्धेन यथोक्तसम्बन्धेन वा निरवच्छिन्नाधिकरणता तदाश्रयव्यक्तयवर्त्तमानं हेतुतावच्छेदकसम्बन्धावच्छिन्नयद्धर्मावच्छिन्नाधिकरणत्वसामान्यं तद्धर्मवत्त्वं विवक्षितम् । धूमवान् वह्नेरित्यादौ पर्वतादिनिष्ठवह्न्यधिकरणताव्यक्तेर्धूमाभावाधिक-रणावृत्तित्वेऽपि अयोगोलकनिष्ठवह्न्यधिकरणताव्यक्तेरतथात्वा-न्नातिव्याप्तिरित्याहुः ।

अन्ये तु हेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुतावच्छेदकाव-च्छिन्नस्वाधिकरणताश्रयवृत्ति यन्निरवच्छिन्नाधिकरणत्वं तदवृत्ति-निरुक्तसाध्याभावत्वविशिष्टनिरूपितयथोक्तसम्बन्धावच्छिन्नाधिकर-णतात्मकत्वमिति विशेषणविशेष्यभावव्यत्यासे तात्पर्य्यम्, स्वपदं हेतुपरम्, इत्थञ्च कपिसंयोगाभाववान् सत्त्वात् कपिसंयोगिभिन्नं गुणत्वादित्यादावपि नाव्याप्तिरित्याहुरिति संक्षेपः ।

लक्षणान्तरमाह, 'साध्यवद्भिन्नेति । साध्यवद्भिन्नो यः साध्या-भाववान् तदवृत्तित्वमित्यर्थः कपिसंयोगी एतद्वृक्षत्वादित्याद्य-व्याप्यवृत्तिसाध्यकाव्याप्तिवारणाय 'साध्यवद्भिन्नेति' साध्याभाववतो

विशेषणमिति प्राञ्चः। तदसत् 'साध्याभाववत्' इत्यस्य व्यर्थतापत्तेः साध्यवद्भिन्नावृत्तित्वम् इत्यस्यैव सम्यक्त्वात्।

नव्यास्तु साध्यवद्भिन्ने साध्याभावः साध्यवद्भिन्नसाध्याभावः तद्वदवृत्तित्वमिति सप्तमीतत्पुरुषोत्तरं मतुप्प्रत्ययः। तथा च साध्यवद्भिन्नवृत्तिर्यः साध्याभावस्तद्वदवृत्तित्वमित्यर्थः। एवञ्च साध्यवद्भिन्नवृत्तीत्यनुक्तौ संयोगी द्रव्यत्वादित्यादावव्याप्तिः। संयोगाभाववति द्रव्ये द्रव्यत्वस्य वृत्तेः, तदुपादाने च संयोगवद्भिन्नवृत्तिः संयोगाभावो गुणादिवृत्तिः संयोगाभाव एव अधिकरणभेदेन अभावभेदात्। तद्वदवृत्तित्वान्नाव्याप्तिः। न च तथापि साध्यवद्भिन्नावृत्तित्वमित्येवास्तु किं साध्याभाववदित्यनेन इति वाच्यम्? यथोक्तलक्षणे तस्य अप्रवेशेन वैयर्थ्याभावात् तस्यापि लक्षणान्तरत्वात्। न च तथापि साध्यवद्भिन्नवृत्तिर्यस्तद्वदवृत्तित्वमेवास्तु किं साध्याभावपदेन इति वाच्यम्? तादृशद्रव्यत्वादिमद्वृत्तित्वात् असम्भवापत्तेः। साध्याभावेत्यत्र साध्यपदमप्यत एव, द्रव्यत्वादेरपि द्रव्यत्वाभावाभावत्वात् भावरूपाभावस्य च अधिकरणभेदेन भेदाभावात्।

ननु तथापि घटाकाशसंयोगघटत्वान्यतराभाववान् गगनत्वादित्यादौ घटानधिकरणदेशावच्छेदेन घटाकाशसंयोगाभावस्य गगने सत्त्वात् सद्धेतुतया अव्याप्तिः साध्यवद्भिन्ने घटे वर्त्तमानस्य साध्याभावस्य घटाकाशसंयोगरूपस्य गगनेऽपि सत्त्वात् तत्र च हेतोर्वृत्तेः। नच साध्यवद्भिन्नवृत्तित्वविशिष्टसाध्याभाववत्त्वं विवक्षितमिति वाच्यम्? साध्याभावपदवैयर्थ्यापत्तेः। साध्यवद्भिन्नवृत्तित्वविशिष्टवदवृत्तित्वस्यैव सम्यक्त्वादिति चेत्? न। अभावाभावस्यातिरिक्तत्वमतेनैतल्लक्षणकरणात् तथा च अधिकरणभेदेन अभावभेदात् साध्यवद्भिन्ने घटे वर्त्तमानस्य साध्याभावस्य प्रतियोगिव्यधिकरणस्य प्रतियोगिमति गगनेऽसत्त्वादव्याप्तेरभा-

वात्। न चैवं साध्याभावेत्यत्र साध्यपदवैयर्थ्यम् अभावाभावस्यातिरिक्तत्वेन द्रव्यत्वादेरभावत्वाभावात् साध्यवह्निन्नवृत्तिघटाभावादेस्तु हेतुमति असत्त्वात् अधिकरणभेदेन अभावभेदादिति वाच्यम्। यत्र प्रतियोगिसमानाधिकरणत्व-प्रतियोगिव्यधिकरणत्वलक्षणविरुद्धधर्माध्यासस्तत्रैव अधिकरणभेदेन अभावभेदाभ्युपगमो न तु सर्वत्र, तथाच साध्यवह्निन्नवृत्तिघटाभावादे र्हेतुमत्यपि सत्त्वात् असम्भववारणाय साध्यपदोपादानात्।

यद्वा घटाकाशसंयोगघटत्वान्यतराभावाभावोऽतिरिक्तः एव घटाकाशसंयोगादीनामननुगततया तथा त्वस्य वक्तुमशक्यत्वात्। घटत्वद्रव्यत्वाद्यभावाभावस्तु नातिरिक्तः घटत्वद्रव्यत्वादीनामप्यनुगतत्वात् तथा च द्रव्यत्वादिकमादायासम्भववारणायैव साध्यपदमिति प्राहुरित्यास्तां विस्तरः।

साध्यवत्प्रतियोगिकान्योन्याभावेति। हेतौ साध्यवत्प्रतियोगिकान्योन्याभावाधिकरणवृत्तित्वाभाव इत्यर्थः। अन्योन्याभावस्य प्रतियोग्यवृत्तित्वेन विशेषणीयः, तेन साध्यवतो व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकान्योन्याभाववति हेतोर्वृत्तावपि न असम्भवः। ननु एवमपि नानाधिकरणकसाध्यके वह्निमान् धूमादित्यादौ साध्याधिकरणीभूततत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकान्योन्याभाववति हेतोर्वृत्तेरव्याप्तिर्दुर्वारा इति प्रतियोग्यवृत्तित्वमपहाय साध्यवत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभावविवक्षणे तु पञ्चमेन सह पौनरुक्त्यमिति चेत्? न। वक्ष्यमाणकेवलान्वय्यव्याप्तिवदस्य अपि अत्र दोषत्वात्। न च तथापि साध्यवत्प्रतियोगिकान्योन्याभावमात्रस्यैव एतल्लक्षणघटकत्वे वक्ष्यमाणकेवलान्वय्यव्याप्तिः अचामङ्गता, केवलान्वयिसाध्यकेऽपि साध्याधिकरणीभूततत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकान्योन्याभावस्य प्रसिद्धत्वादिति वाच्यम्? तत्रापि तादृशा-

न्योन्याभावस्य प्रसिद्धत्वेऽपि तद्वति हेतोर्वृत्तेरेव अव्याप्ते-र्दुर्वारत्वात्।

यद्वा साध्यवत्प्रतियोगिकान्योन्याभावपदेन साध्यवत्त्वाव-च्छिन्नप्रतियोगिताकान्योन्याभाव एव विवक्षितः। न चैवं पञ्चमाभेदः, तत्र साध्यवत्त्वावच्छिन्नप्रतियोगिकान्योन्याभाव-वत्त्वेन प्रवेशः। अत्र तु तादृशान्योन्याभावाधिकरणत्वेन वृत्त्यधिकरणत्वप्रवेशाप्रवेशाभ्यामेव भेदात्। अखण्डाभावघटक-तया च नाधिकरणत्वांशस्य वैयर्थ्यमिति न कोऽपि दोष इति दिक्।

सकलेति। साकल्यं साध्याभाववतो विशेषणं तथाच यावन्ति साध्याभावाधिकरणानि तन्निष्ठाभावप्रतियोगित्वं हेतोः व्याप्ति-रित्यर्थः। धूमाद्यभाववज्जलह्रदादिनिष्ठाभावप्रतियोगित्वाद्व-ह्न्यादावतिव्याप्तिरिति यावदिति साध्याभाववतो विशेषणम्, साध्याभावविशेषणत्वे तत्तद् ह्रदावृत्तित्वादिरूपेण यो वह्न्या-द्यभावस्तस्यापि सकलसाध्याभावत्वेन प्रवेशात् तावदधिकरणा-प्रसिद्ध्या असम्भवापत्तेः। न च द्रव्यं सत्त्वादित्यादौ द्रव्यत्वा-भाववति गुणादौ सत्त्वादेर्विशिष्टाभावादिसत्त्वादतिव्याप्तिरिति वाच्यम्? तादृशाभावप्रतियोगितावच्छेदकहेतुतावच्छेदकवत्त्व-स्येह विवक्षितत्वात्। प्रतियोगिता च हेतुतावच्छेदकसम्बन्धा-वच्छिन्ना ग्राह्या, तेन द्रव्यत्वाभाववति गुणादौ सत्तादेः संयोगा-दिसम्बन्धावच्छिन्नाभावसत्त्वेऽपि नातिव्याप्तिः। साध्याभावश्च साध्यतावच्छेदकावच्छिन्न-साध्यतावच्छेदकसम्बन्धावच्छिन्न-प्रति-योगिताको ग्राह्यः, अन्यथा पर्वतादावपि वह्न्यादेर्विशिष्टा-भावादिसत्त्वेन समवायादिसम्बन्धावच्छिन्नवह्न्यादिसामान्या-भावसत्त्वेन च यावदन्तर्गततया तन्निष्ठाभावप्रतियोगित्वाभा-वात् धूमस्य असम्भवः स्यात्। न च कपिसंयोगी एतद्वृक्षत्वात्

इत्यादौ एतद्वृत्तस्यापि तादृशसाध्याभाववत्त्वेन यावदन्तर्गततया तन्निष्ठाभावप्रतियोगित्वाभावादेतद्वृत्तत्वस्याव्याप्तिरिति वाच्यम् ? किञ्चिदनवच्छिन्नायाः साध्याभावाधिकरणताया इह विवक्षितत्वात् । इत्थञ्च किञ्चिदनवच्छिन्नायाः कपिसंयोगाभावाधिकरणताया गुणादाविव सत्त्वात्तत्र च हेतोरप्यभावसत्त्वान्नाव्याप्तिः । न च कपिसंयोगाभाववान् सत्त्वादित्यादौ साध्याभावस्य कपिसंयोगादेर्निरवच्छिन्नाधिकरणत्वाप्रसिद्ध्या अव्याप्तिरिति वाच्यम् ? केवलान्वयिनि अभावादित्यनेन ग्रन्थकृतैव एतद्दोषस्य वक्ष्यमाणत्वात् । न च पृथिवी कपिसंयोगादित्यादौ पृथिवीत्वाभाववति जलादौ यावत्येव कपिसंयोगाभावसत्त्वादतिव्याप्तिरिति वाच्यम् ? तन्निष्ठपदेन तत्र निरवच्छिन्नवृत्तिमत्त्वस्य विवक्षितत्वात् । इत्थञ्च पृथिवीत्वाभावाधिकरणे जलादौ यावदन्तर्गते निरवच्छिन्नवृत्तिमानभावो न कपिसंयोगाभावः किन्तु घटत्वाद्यभाव एव तत्प्रतियोगित्वस्य हेतावसत्त्वान्नातिव्याप्तिः । न चैवमन्योन्याभावस्य व्याप्यवृत्तितानियमनये द्रव्यत्वाभाववान् संयोगवद्भिन्नत्वादित्यादेरपि सद्धेतुतया तत्राव्याप्तिः संयोगवद्भिन्नत्वाभावस्य संयोगरूपस्य निरवच्छिन्नवृत्तेरप्रसिद्धेरिति वाच्यम् ? अन्योन्याभावस्य व्याप्यवृत्तितानियमनयेऽन्योन्याभावस्य अभावो न प्रतियोगितावच्छेदकस्वरूपः, किन्त्वतिरिक्तो व्याप्यवृत्तिः अन्यथा मूलावच्छेदेन कपिसंयोगिभेदाभावभानानुपपत्तेरिति संयोगवद्भिन्नत्वाभावस्य निरवच्छिन्नवृत्तिमत्त्वात् । वस्तुतस्तु सकलपदमत्राशेषपरं न तु अनेकपरम् एतद्घटत्वाभाववान् पटत्वादित्याद्येकव्यक्तिविपक्षके साध्याभावाधिकरणस्य यावत्त्वाप्रसिद्ध्या अव्याप्त्यापत्तेः, तथाच किञ्चिदनवच्छिन्नाया निरुक्तसाध्याभावाधिकरणताया व्यापकीभूतो योऽभावः हेतुतावच्छेदकसम्बन्धावच्छिन्न/ तत्प्रतियोगितावच्छेदकहेतुतावच्छेदकवत्त्वं

लक्षणार्थः। न च सत्त्वादिसामान्याभावस्यापि प्रमेयत्वादिना निरुक्तसाध्याभावाधिकरणताया व्यापकत्वात् द्रव्यं सत्त्वादित्यादावतिव्याप्तिः। तद्वन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वं व्यापकत्वमित्युक्तौ तु निर्धूमत्ववान् निर्वह्नित्वादित्यादावव्याप्तिः निर्वह्नित्वाभावानां वह्निव्यक्तीनां सर्वासामेव चालनीयन्यायेन निर्धूमत्वाभावाधिकरणतावन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वादिति वाच्यम् ? तादृशाधिकरणताया, व्यापकतावच्छेदकं हेतुतावच्छेदकसम्बन्धावच्छिन्नयद्धर्मावच्छिन्नाभावत्वं तद्धर्मवत्त्वस्य विवक्षितत्वात्। व्यापकतावच्छेदकत्वन्तु तद्वन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वम्। न तु तद्वन्निष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वं तद्वति निरवच्छिन्नवृत्तिमान् योऽभावस्तत्प्रतियोगितानवच्छेदकत्वं वा, प्रकृते व्यापकतायां प्रतियोगिवैयधिकरण्यस्य निरवच्छिन्नवृत्तित्वस्य वा प्रवेशे प्रयोजनविरहात्। तेन पृथिवी कपिसंयोगादित्यादौ नातिव्याप्तिः कपिसंयोगाभावत्वस्य निरुक्तव्यापकतावच्छेदकत्वविरहादित्येव परमार्थः।

"साध्यवदन्येति"। अत्रापि प्रथमलक्षणोक्तरीत्या हेतौ साध्यवदन्यवृत्तित्वाभाव इत्यर्थः। तादृशवृत्तित्वाभावश्च तादृशवृत्तित्वसामान्याभावो बोध्यः। तेन धूमवान् वह्नेरित्यादौ धूमवदन्यजलह्रदादिवृत्तित्वाभावस्य धूमवदन्यवृत्तित्वजलत्वोभयाभावस्य च हेतौ सत्त्वेऽपि नातिव्याप्तिः। साध्यवदन्यत्वञ्च अन्योन्याभावत्वनिरूपितसाध्यवत्त्वावच्छिन्न-प्रतियोगिताकाभाववत्त्वं तेन वह्निमान् धूमादित्यादौ तत्तद्वह्निमदन्यस्मिन् धूमादेर्वृत्तावपि नाव्याप्तिः, न वा वह्निमत्त्वावच्छिन्नप्रतियोगिताकात्यन्ताभावस्य स्वावच्छिन्नभिन्नभेदरूपस्य अधिकरणे पर्वतादौ धूमस्य वृत्तावप्यव्याप्तिः। तस्य साध्यवत्त्वावच्छिन्नप्रतियोगि-

ताया अत्यन्ताभावत्वनिरूपितत्वेन अन्योन्याभावत्वनिरूपितत्व-विरहात् । अन्योन्याभावत्वनिरूपितत्वञ्च तादात्म्यसम्बन्धाव-च्छिन्नत्वमेव । साध्यवत्त्वञ्च साध्यतावच्छेदकसम्बन्धेन बोध्यम् । तेन वह्निमान् धूमादित्यादौ वह्निमत्त्वावच्छिन्नप्रतियोगिताकस्य समवायेन वह्निमतोऽन्यान्याभावस्य अधिकरणे पर्वतादौ धूमादे-र्वृत्तावपि नाव्याप्तिः । सर्वमन्यत् प्रथमलक्षणोक्तदिशा अव-सेयम् । यथा चास्य न तृतीयलक्षणाभेदस्तथोक्तं तत्रैवेति समासः । सर्वाण्येव लक्षणानि केवलान्वय्यव्याप्त्या दूषयति, "केवलान्वयिनि अभावादिति" । पञ्चानामेव लक्षणानाम् इदं वाच्यं ज्ञेयत्वादित्यादिव्याप्यवृत्तिकेवलान्वयिसाध्यके द्वितीयादि-लक्षणचतुष्टयस्य तु कपिसंयोगाभाववान् सत्त्वादित्याद्यव्याप्य-वृत्तिकेवलान्वयिसाध्यकेऽपि चाभावादित्यर्थः, साध्यतावच्छेदक-सम्बन्धावच्छिन्न-साध्यतावच्छेदकावच्छिन्न-प्रतियोगिताक-साध्या-भावस्य साध्यतावच्छेदकसम्बन्धेन साध्यवत्त्वावच्छिन्नप्रतियोगिता-कान्योन्याभावस्य चाप्रसिद्धत्वात्, कपिसंयोगाभाववान् सत्त्वादि-त्यादौ निरवच्छिन्नसाध्याभावाधिकरणत्वस्य अप्रसिद्धत्वाच्च इति भावः । तृतीयलक्षणस्य केवलान्वयिसाध्यकासत्त्वञ्च तद्व्याख्याना-वसरे एव प्रपञ्चितम् । एतच्चोपलक्षणं द्वितीये कपिसंयोगी एतद्वृक्ष-त्वादित्यादावप्यव्याप्तिः अधिकरणभेदेन अभावभेदे मानाभावेन कपिसंयोगवद्भिन्नवृत्तिकपिसंयोगाभाववति वृक्षे एतद्वृक्षत्वस्य वृत्तित्वात् । न च साध्यवद्भिन्नवृत्तित्वविशिष्टसाध्याभाववद्-वृत्तित्वं वक्तव्यम् एवञ्च वृक्षस्य विशिष्टाधिकरणत्वाभावात् न अव्याप्तिरिति वाच्यम् ? साध्याभावपदवैयर्थ्यापत्तेः । साध्यव-द्भिन्नवृत्तित्वविशिष्टवदवृत्तित्वस्यैव सम्यक्त्वात् । सद्धेतौ हेत्व-धिकरणे विशिष्टाधिकरणत्वाभावादेव असम्भवाभावात् । तृतीये साध्यवत्प्रतियोगिताकान्योन्याभावमात्रस्य घटकत्वे चालनीय-

न्यायेन अन्योन्याभावमादाय नानाधिकरणकसाध्यके वह्निमान् धूमादित्यादावव्याप्तिश्च इत्यपि बोध्यम् ।

इति श्रीमथुरानाथतर्कवागीशविरचिते तत्त्वचिन्तामणिरहस्ये अनुमानखण्डे व्याप्तिवादरहस्ये व्याप्तिपञ्चकरहस्यम् ।

—०—

# अथ जगदीशभट्टाचार्य्यकृता रघुनाथशिरोमणि-व्याख्याविवृतिः ।

"समारब्धेति" समारब्धं यदनुमानप्रामाण्यपरीक्षणं प्रामाण्यसाधनं तत्कारणीभूतं यद्व्याप्तिग्रहोपायप्रतिपादनं तन्निदानं व्याप्तिस्वरूपनिरूपणमित्यर्थः । "अव्याप्यवृत्तीति" कपिसंयोगी एतद्वृक्षत्वात् इत्यादावित्यर्थः । इदञ्च येन रूपेण येन सम्बन्धेन च साध्यत्वं तदवच्छिन्नस्य साध्याभावस्य प्रवेशमादृत्य, अन्यथा तु व्याप्यवृत्तिसाध्यकेऽपि विशिष्टाभावादिकमादाय दोषो बोध्यः । अव्याप्यवृत्तिसाध्यकेऽपि आकाशादिहेतावव्याप्त्यभावादाह सद्धेताविति । वृत्तिमद्धेताविति तदर्थः । अव्याप्यवृत्तिसाध्यं यत्र तत्र सन् वर्त्तमानो यो हेतुस्तत्रेत्यर्थः तेन संयोगाभाववान् गुणत्वादित्यादावव्याप्त्यभावेऽपि न क्षतिरित्यपि वदन्ति । ननु साध्यवद्भिन्नो यः साध्याभाववान् इत्यर्थे साध्याभाववत्पदवैयर्थ्यं साध्यवद्भिन्नावृत्तित्वस्यैव सम्यक्त्वात् न चावृत्तित्वेन समं साध्यवद्भिन्नस्यान्वयाविवक्षणात् । साध्याभाववता सममेव तादात्म्येनान्वयविवक्षणान्न वैयर्थ्यमिति वाच्यम् ? तथापि साध्यवद्भिन्नात्मको यो मतुबर्थः सम्बन्धी तदवृत्तित्वस्य सम्यक्त्वे साध्याभावपदवैयर्थ्यध्रौव्यात् अतः सप्तमीसमासं समर्थ्य व्याचष्टे साध्यवद्भिन्ने इति । तथाच साध्य-

वह्निन्नस्य वृत्तावनन्वयात् यथा सन्निवेशे न वैयर्थ्यम् । साध्याभावे साध्यवह्निन्नवृत्तित्वविशेषणं तु अव्याप्यवृत्तिसाध्यकसंग्रहार्थम् एव इत्याशयः । साध्यवह्निन्नवृत्तिद्रव्यत्वादिमति पर्वतादौ धूमादेः सत्त्वादव्याप्तिरसम्भवो वा स्यात् ? अतः साध्याभावेति । न च कपिसंयोगी एतत्त्वादित्यादेः संग्रहार्थम् अधिकरणभेदेन अभावभेदमाहृत्य एव लक्षणमिदं कार्य्यं तथाच साध्यवह्निन्ने योऽभावस्तद्वदवृत्तित्वस्यैव सम्यक्त्वे साध्यपदवैयर्थ्यमिति वाच्यम् ? प्रतियोगितासंसर्गेण साध्यीयत्वेनैव साध्याभावस्य प्रवेशो न तु अभावत्वेनापीति तद्वैयर्थ्यशङ्कानवकाशात्, वस्तुतः स्वप्रतियोगितावच्छेदकसम्बन्धेन साध्यवह्निन्ने वर्त्तते यः साध्यतावच्छेदकसम्बन्धेन साध्यीयोऽभावः तद्वदवृत्तित्वमर्थः । तथा च साध्यतावच्छेदकसम्बन्धेन साध्यीयत्वार्थकस्य साध्यपदस्य अनुक्तौ स्वप्रतियोगितावच्छेदकीभूतसमवायादिसम्बन्धेन वह्न्यादिमतोऽन्यस्मिन् पर्वतादौ यः समवायाद्यवच्छिन्नवह्न्याद्यभावस्तद्वति धूमादेः सत्त्वादव्याप्तिः स्यात्, अतः तदुपात्तमिति नव्याः । केचित्तु व्याप्यवृत्तित्वाव्याप्यवृत्तित्वविरुद्धधर्माध्यासात् संयोगाद्यभावस्यैव द्रव्यगुणाद्यधिकरणभेदेन भेदो न तु गगनाद्यभावस्य मानाभावात्, तथाच साध्यवह्निन्नवृत्तिगगनाद्यभाववति पर्वतादौ धूमादेः सत्त्वादव्याप्तिः, अतः साध्यपदमित्याहुः तत् मन्दं, गुणे गगनाद्यभावे गुणत्वादिसामानाधिकरण्यं न तु द्रव्ये गगनाद्यभावे तथात्वम् इत्यादि प्रतीत्या गगनाद्यभावस्यापि गुणत्वादिसामानाधिकरण्यतदभावयोः विरुद्धयोः धर्मयोः सम्भवादिति दिक् । न च घटत्वघटाकाशसंयोगान्यतरत्वाद्यवच्छिन्नाभाववान् गगनत्वादित्यत्राव्याप्तिः, साध्यवह्निन्ने घटे वर्त्तमानस्य गगनघटसंयोगात्मकसाध्याभावस्यापि अधिकरणे गगनादौ गगनत्वादिहेतोः सत्त्वादिति वाच्यम् ? अभावाभावस्याति-

रिक्तताभ्रमत एवैतल्लक्षणकरणादिति भावः। भिन्नत्वे इति। द्रव्यनिष्ठसंयोगाभावतो भिन्नत्वे इत्यर्थः। मानाभावादिति। तथा चात्राव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिरिति भावः।

हेतोरिति। न च साध्यवत्प्रतियोगिकान्योन्याभावस्य केवलान्वयित्वादसम्भव एव वक्तुमुचितो नाव्याप्तिरिति वाच्यम्? वह्निमान् गगनादित्यत्रावृत्तिगगनादौ लक्षणसम्भवेन तस्यापि सद्धेतुतायाः स्वयं वक्ष्यमाणत्वादिति भावः। साध्यपदस्य सिद्धिकर्मतत्तद्व्यक्तिपरतया तत्तद्व्यक्त्यवच्छिन्नान्योन्याभावासामानाधिकरण्यरूपस्य पर्य्यवसितार्थस्य द्रव्यं पृथिवीत्वादित्यादाविव सम्भवाद् गन्धवती पृथिवीत्वादित्यादावव्याप्तिकथनमित्यपि वदन्ति।

ननु सकलस्य साध्यप्रतियोगिकाभावस्याधिकरणाप्रसिद्ध्या व्यभिचारिणि अतिव्याप्तिवारणाय यदि साध्याभावस्य विशेषणं साकल्यं तदा वह्निमान् धूमादित्यादिसद्धेतावव्याप्तिः, तत्रापि तत्तत्सपक्षावृत्तित्वावच्छिन्नाभावरूपस्य तत्तत्विपक्षावृत्तित्वावच्छिन्नाभावरूपस्य च साध्यप्रतियोगिकाभावस्योभयस्य अधिकरणाप्रसिद्धेरत आह साध्याभाववतीति। तथाच साकल्यं न साध्यभावविशेषणम् अतो नाप्रसिद्धिरिति भावः। केचित्तु ननु धूमवान् वह्नेः इत्यादि व्यभिचारिणि अतिव्याप्तिः, साध्याभाववत् यत्किञ्चिन्निष्ठाभावप्रतियोगित्वादित्यत आह साकल्यं साध्याभाववतीति। ननु एवमपि साध्याभाववन्निखिलान्तर्गते महानसादौ वर्त्तमानस्य अभावस्य प्रतियोगित्वं धूमादौ नास्तीति अव्याप्तितादवस्थ्यमत उक्तं साध्ये चेति। तथा च सपक्षो महानसादिर्न सकलसाध्याभाववान् इति अदोषः। प्राञ्चस्तु व्यभिचारिणि अतिव्याप्तिवारणार्थं साध्याभाववति यावत्त्वविशेषणे दत्त एव साध्ये यावत्त्वविशेषणमव्याप्तिवारक-

तया सार्थकं भवति, अतः साध्याभाववत्येव साकल्यं प्राक् प्रयोजयति साकल्यमित्यादिना इत्येवमवधारयन्ति । तत् मन्दं, साध्याभाववति साकल्यानुक्तावतिव्याप्तिवारकतया एव साध्ये साकल्यविशेषणस्य प्रथमतः सार्थकत्वसम्भवात् । अन्यथा गगनावृत्तिधर्मवान् द्रव्यत्वादित्यादौ पटत्वादिलक्षणतत्तत्साध्यव्यक्त्यभाववद्गुणादिनिष्ठाभावप्रतियोगिनि द्रव्यत्वादौ अतिप्रसङ्गादिति ध्येयम् । ननु साध्यवति अपि द्वित्वाद्यवच्छिन्नप्रतियोगिताकस्य सकलसाध्यप्रतियोगिकाभावस्य सत्त्वादसम्भवः । किञ्च सकलपदोत्तरनाम्ना सकलसाध्यप्रतियोगिताकाभाववतोऽनुपस्थापनात् तेन समं सकलपदस्य कर्मधारयोऽपि अनुपपन्न इत्यत आह—साध्याभाव इति । तथा च साध्याभाववत्येव साकल्यं देयम् न तु साध्येऽपीति भावः । साध्याभाववति साकल्यदानस्य प्रयोजनमाह तेनेति । विपक्षैकदेशः कश्चिद्विपक्षः साध्यनिष्ठसाकल्यस्य साध्यसामान्याभावस्य वा निवेशस्य फलमाह न वेति । एकव्यक्तिसाध्यके सकलसाध्योक्तौ अपि अव्याप्तिः अग्रे स्थास्यतीत्याशयेन नाना इत्युक्तम् । अव्याप्यवृत्तीति । कपिसंयोगी एतत्त्वादित्यादौ इत्यर्थः । यद्यप्यग्रे हेत्वभावस्यापि प्रतियोगिवैयधिकरण्यावच्छिन्नस्यैव निवेशः करणीयः इति अव्याप्यवृत्तिहेतावव्याप्तिः सम्भवति, तथापि यथाश्रुतमूलस्य न तत्र अव्याप्तिरित्यावेदयितुं व्याप्यवृत्तिहेतूक्तिः । व्यभिचारिणीति । एतद्वृक्षत्ववान् कपिसंयोगात् इत्यादावित्यर्थः । अभावद्वये इति । साध्याभावे हेत्वभावे चेत्यर्थः । अत्र च साध्याभावे प्रतियोगिवैयधिकरण्यं साध्यताघटकसम्बन्धेन प्रतियोगिनो यदधिकरणं तदवृत्तित्वं, तेन धूमाद्यभाववतोऽपि अयः पिण्डादेः कालिकसम्बन्धेन धूमादिमत्वेऽपि नातिव्याप्तिः, हेत्वभावे प्रतियोगिवैयधिकरण्यं

तु प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वघटितं बोध्यम् । तेन अयमात्मा ज्ञानादित्यादौ साध्याभाववतो घटत्वादेर्विषयतया हेत्वाभावप्रतियोगिमत्त्वेऽपि न अव्याप्तिः, हेत्वभावोऽपि इति अपिना साध्याभावसंग्रहः । तेन विशिष्टसत्तावान् जातेरित्यादौ नातिव्याप्तिः । यद्यपि साध्याभावोऽपीत्येवं क्रमेण वक्तुमुचितम् अपिशब्दादेव हेत्वभावस्य लाभसम्भवात् तथापि तत्प्रतियोगित्वञ्च इत्यग्रिमपदेनानिर्दिष्टहेत्वभावस्य परामर्शासम्भवात् हेत्वभावप्रतियोगित्वञ्च इत्यभिधाने च ग्रन्थगौरवाभिधानम् । प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगीति । प्रतियोगिपदं प्रतियोगितावच्छेदकताघटकसम्बन्धेनावच्छेदकस्य वैशिष्ट्यलाभाय, तेन ह्रदादौ कालिकादिसम्बन्धेन धूमाद्यवच्छिन्नस्य काष्ठादेः संयोगसम्बन्धेन सत्त्वेऽपि नाव्याप्तिः, तत्प्रतियोगित्वं, हेत्वभावप्रतियोगित्वं, हेतुतावच्छेदकरूपेणेति । हेतुतावच्छेदकसम्बन्धेन इत्यपि बोध्यम् । तेनात्मभिन्नं द्रव्यत्वादित्यादौ साध्याभाववति आत्मनि वर्त्तमानस्य प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणस्य कालिकादिसम्बन्धेन द्रव्यत्वाभावस्य प्रतियोगित्वेऽपि द्रव्यत्वस्य नातिव्याप्तिः । न च हेतुतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्योक्तौ एव अतिव्याप्तिवारणसम्भवात्, हेतुतावच्छेदकसम्बन्धेन प्रतियोगित्वविवक्षा व्यर्थेति वाच्यं तथा सति निर्धूमत्वव्याप्यवान् निर्वह्नित्वादित्यादौ निर्वह्नित्वभेदमादायैव लक्षणसम्भवे निर्धूमत्वव्याप्येत्याद्युत्तरग्रन्थवक्ष्यमाणाव्याप्त्यलग्नतापत्तेरिति ध्येयं वस्तुतः निर्वह्नित्वस्य व्याप्यवृत्तितया तद्धेतुस्थले हेत्वभावे प्रतियोगिव्यधिकरणत्वं न देयं व्यर्थत्वात्; परन्तु हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वं वाच्यम् अतः नाग्रिमग्रन्थासङ्गतिरिति ध्येयम् । हेत्वभावे प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यविवक्षायाः

फलमाह तेन द्रव्यत्वादाविति अन्यथा साध्याभाववति गुणादौ विशिष्ट-सत्ताभावस्य सत्तारूपप्रतियोगि-समानाधिकरणत्वाद-व्याप्तिरेव स्यादिति भावः। अत्र तु द्रव्यत्वसाध्यतायां साकल्या-प्रसिद्धा अव्याप्तेरुक्तविवक्षयापि अप्रतीकारात् आदिपदं, तेन गुणवत्त्वादिसाध्यस्योपग्रहः द्रव्येतरासमवेतमात्रं वा प्रकृते द्रव्यत्वमिति ध्येयम्। हेतुतावच्छेदकरूपावच्छिन्नप्रतियोगित्व-विवक्षायाः फलमाह न चेति। सत्वादाविति। द्रव्यत्वादौ साध्ये इति अनुषज्यते। यत्र एकव्यक्तिकमिति। तथाच द्रव्यं पृथिवीत्वात् इत्यादावव्याप्तिः सकलसाध्याप्रसिद्धेरित्यर्थः। ननु इतोऽपस्वरसात् साध्यसामान्याभावस्यैव निविष्टत्वात् साध्ये साकल्यं न देयमेव इत्यत आह विपक्षो वेति। विपक्षः साध्या-भाववान्, तद्घटावृत्तिधर्मवान् तद्घटान्यत्वादित्यादावव्याप्तिः साध्याभाववत्तद्घटस्य साकल्याप्रसिद्धेरिति भावः। साध्याभाव-वन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकीभूताभावप्रतियोगित्वं वक्तव्यमतः दोषान्तरमाह निर्धूमेति कश्चित्। ननु साध्यादि-भेदेन व्याप्तेर्भेदात् यत्रैकव्यक्तिरेव विपक्षस्तत्र लक्षणे साध्या-भाववति साकल्यविशेषणं न देयमिति दोषान्तरमाह निर्धूमत्व-व्याप्य इति। निर्धूमत्वस्य साध्यत्वे यत्रैकव्यक्तिकमित्यनेनैव गतार्थता स्यादतो व्याप्यपर्यन्तं निर्धूमत्वव्याप्यस्यापि ह्रदादेः ह्रदत्वादिना साध्यत्वे वह्न्यभावव्यभिचारित्वादसंग्रहो न दोष इत्यत उक्तं तत्त्वेन साध्ये इति। निर्धूमत्वव्याप्यत्वेन साध्ये इत्यर्थः। प्रत्येकमिति। हेत्वभावस्य महानसीयादिवह्नेः साध्याभाववत् सकलान्तर्गत पर्वताद्यवृत्तित्वादव्याप्तिरिति भावः। निरुक्तप्रति-योगिवैयधिकरण्यावच्छिन्नसाध्याभावव्यापकतावच्छेदकं निरुक्त-प्रतियोगिवैयधिकरण्यावच्छिन्नयद्रूपावच्छिन्नाभावत्वं तद्रूपवत्त्वं व्याप्तिरित्युक्तौ तु न दोष इति ध्येयम्। ननु साध्यवत्प्रति-

यौगिकान्यत्वस्य धूमादिमतिसत्त्वादव्याप्तिरत आह अत्रेति। तथाच साध्यपदेन निरूढलक्षणया उपस्थापितस्य साध्यवत्त्वावच्छिन्नप्रतियोगिताकस्य अन्यपदार्थैकदेशे अन्यत्वे तादात्म्येन अन्वयात् साध्यवति च साध्यवत्त्वावच्छिन्नभेदासत्त्वात् न अव्याप्तिः गुरुधर्मस्य अवच्छेदकत्वोपगमाच्च द्रव्यं पृथिवीत्वादित्यादौ द्रव्यत्वत्वविशिष्टद्रव्यत्ववत्त्वावच्छिन्नभेदाप्रसिद्धा नाव्याप्तिरिति भावः। यद्धर्मविशिष्टबोधपदसमभिव्याहृतेन अन्यादिपदेन उपस्थापिते अन्यत्वादौ तद्धर्मावच्छिन्नप्रतियोगिताकत्वप्रकारेणैव तादात्म्येन अन्वयो नतु तद्धर्माश्रयप्रतियोगिताकत्वेन इत्यत्र व्युत्पत्तौ प्राचां संवादमाह नहीति। तथाच तादृशव्युत्पत्त्यस्वीकारे नीलघटे पीतघटप्रतियोगिकभेदसत्त्वात् नीलघटो घटान्य इत्यपि व्यवहारः स्यादिति भावः। अत्र च द्रव्यं घटान्यदित्याद्यप्रयोगात् यद्विशिष्टप्रतियोगिकत्वेन भेदः अन्यादिशब्देन बोध्यः। तदवृत्तिधर्मस्यैव अनुयोगितावच्छेदकत्वात् तत्र घटो घटान्य इत्यस्य वारणासम्भवात्, नीलघटत्वस्य धर्मितावच्छेदकत्वानुधावनमिति मन्तव्यम्। नीलो घटो घटान्य इत्येव सम्यक्पाठः तथैव प्रकृतोपयोगित्वसङ्गतेर्घटादन्य इति पाठस्तु साध्यवदन्य इत्यत्र पञ्चमीसमासे लुप्तविभक्तिस्मारितप्रतियोगित्वे प्रकृत्यर्थतावच्छेदकावच्छिन्नत्वस्य संसर्गमर्य्यादया भानमाहत्य कथञ्चित् सङ्गमनीयः। घटः पटो न इत्यादौ पटपदं मुख्यार्थपरमेव न तु प्रकृत इव पटत्वावच्छिन्नप्रतियोगिताकपरं निपातातिरिक्तस्थले एव नामार्थयोर्भेदान्वयस्य अव्युत्पन्नतया नञुपटोपस्थाप्यभेदे पटत्वावच्छिन्नप्रतियोगिताकत्वसंसर्गेणैव पटस्यान्वयसम्भवात्। पटत्वावच्छिन्नप्रतियोगिताकत्वन्तु पटत्वमवच्छिन्नत्वं प्रतियोगित्वञ्चेति त्रितयमेव विशेष्यविशेषणभावापन्नसंसर्गो न तु अनुगत्या पटत्वावच्छिन्नं यत् प्रतियोगित्वं

तस्मात्वं पटो न इत्यत्र पटत्वावच्छिन्नस्य अनुभवसिद्धत्वात् अन्यथा प्रतियोगिताख्यत्तिभिरेव तत्तद्विशिष्टबुद्ध्युपपत्तौ पटत्वादेस्तदवच्छेदकत्वमेव न स्यात् मानाभावात् अतएव केवलान्वयिग्रन्थे वह्निर्नास्तीत्यत्र वह्नित्वमवच्छिन्नत्वं प्रतियोगित्वञ्च संसर्गमर्य्यादया भासते इति स्वयमप्युक्तम् । इत्थमेव च प्रमेयं नास्ति कम्बुग्रीवादिमान् नास्तीत्यादिशाब्दबोधानां संसर्गकोटावेव प्रतियोगितायां प्रमेयत्वाद्यवच्छिन्नत्वावगाहिताया भ्रमत्वं संसर्गप्रकारसाधारणविशेष्यविशेषणभावस्यैव भ्रमत्वे घटकत्वात् अन्यथा स्वरूपसम्बन्धेन प्रमेयत्वावच्छिन्नप्रतियोगित्वस्य अलीकतया अखण्डताद्दृशसम्बन्धेन प्रमेयस्य अभावधर्म्मिणि अन्वयासम्भवेन भ्रमत्वानुपपत्तेः सदुपरागेणास्तः संसर्गमर्य्यादया भानस्य मणिकृता अनङ्गीकारात् क्रमेन पटत्वाद्यवच्छिन्नप्रतियोगित्वसम्बन्धेन च अभावे प्रमेयस्य सत्वेन ताद्दृशसम्बन्धेन भ्रमत्वस्य वक्तुमशक्यत्वात् पटत्वादेरन्वयितानवच्छेदकतया तदवच्छिन्नप्रतियोगित्वसम्बन्धेन प्रमेयत्वादिविशिष्टस्यान्वये निराकाङ्क्षत्वाच्च अन्यथा घटवति अपि घटो नास्तीत्यादेः प्रमात्वापत्तेः तत्तत् घटत्वावच्छिन्नप्रतियोगित्वसम्बन्धेन घटविशिष्टस्य घटविशेषाभावस्य तत्र सत्त्वात् एतेन सत्तासमवायिनि अपि गुणादौ विशिष्टसत्त्वात्वावच्छिन्नस्य समवायेन असत्त्ववत् घटत्वाद्यवच्छिन्नप्रतियोगित्वसम्बन्धेन घटत्वावच्छिन्नवतोऽपि घटाद्यभावस्य न ताद्दृशसम्बन्धेन प्रमेयत्वाद्यवच्छिन्नवत्त्वम् । अतः प्रमेयं नास्तीत्यादौ घटत्वावच्छिन्नप्रतियोगित्वसम्बन्धेनैव प्रमेयत्वावच्छिन्नत्वस्यैव अभावांशे भ्रमत्वमित्यपि प्रत्युक्तं घटत्वादेरन्वयितावच्छेदकतया तदवच्छिन्नप्रतियोगित्वसम्बन्धेन प्रमेयत्वविशिष्टस्य अन्वये निराकाङ्क्षतया तथा शाब्दस्य असम्भवात् इति ध्येयम् । नीलो-घटो नास्तीत्यादौ नीलघटत्वस्य अन्वयितावच्छेदकत्वे ताद्दृश-

धर्मावच्छिन्नप्रतियोगित्वमेव संसर्गो न तु नीलत्वादिप्रत्येकधर्मावच्छिन्नप्रतियोगित्वं नीलघटस्य पीतघटस्य च अधिकरणे तादृशप्रयोगानुपपत्तेः समवायेन नीलत्वोपलक्षितस्य घटत्वमात्रस्य अन्वयितावच्छेदकत्वस्थले तु नोपलक्षितघटत्वावच्छिन्नप्रतियोगित्वमेव तथा संयोगेन घटो नास्तीत्यादौ तृतीयाविभक्तेर्नावच्छिन्नत्वमर्थः संसर्गीभूतप्रतियोगितायां तदन्वयासम्भवात् किन्तु अवच्छिन्नप्रतियोगिताकत्वं प्रतियोगितामात्रं वा अवच्छिन्नत्वसंसर्गेण संयोगादेस्तत्रान्वयादेव विशिष्टलाभात् न च एवं संयोगेन घटाभावस्येव समवायेन घटविशिष्टद्रव्यत्वाभावतया समवायेन कपाले घटो नास्तीति व्यवहारापत्तेः तृतीयान्तसमभिव्याहारस्थले तदुपस्थाप्यप्रतियोगित्वस्येव संसर्गतया भानस्य व्युत्पन्नत्वात् समवायावच्छिन्नघटत्वावच्छिन्नप्रतियोगिताकाभावस्य च कपाले विरहात् । अस्तु वा घटत्वावच्छिन्नत्वस्येव संयोगादिसम्बन्धावच्छिन्नत्वस्यापि प्रतियोगित्वांशे संसर्गमर्य्यादयैव भानं तृतीयान्तसमभिव्याहृतस्य नियामकत्वाच्च नातिप्रसङ्गः । घटानधिकरणं भूतलम् इत्यादौ तु लक्षणया अधिकरणपदमेव घटाधिकरणार्थकं घटपदं तु तात्पर्य्यग्राहकम् अन्यथा अधिकरणपदेन अधिकरणसामान्यभिन्नत्वोक्तौ च भूतले तस्य बाधा स्यात् न च घटान्वितस्यैव अधिकरणस्य भेदस्तत्र नञा बोधनीयः समासान्तर्गतनञ उत्तरपदार्थमात्रान्वयित्वव्युत्पत्तेः अन्यथा नीलो घटो पट इत्यादौ नीलघटान्यस्य घटत्वं नीलाप्रमेयः पट इत्यादौ च नीलप्रमेयान्यस्य पटत्वं प्रतीयते वस्तुतः सम्बन्धिक पदस्थले व्युत्पत्तिवैचित्र्यात् प्रतियोगितानवच्छेदकं घटानधिकरणमित्यादौ घटाद्यन्वितस्यैवाधिकरणभेदो भासते इति परमार्थः । पीतः शङ्खो नास्तीत्यादिशाब्दबोधस्तु शङ्खत्वावच्छिन्नतया न प्रतियोगित्वमवगाहते तस्मात्तस्य अन्वयितानवच्छेदकत्वात् शङ्ख-

वत्तया निश्चिते धर्मिण्यपि तादृशप्रयोगात् परन्तु पीतशङ्खत्वावच्छिन्नप्रतियोगिताकत्वेन संसर्गमर्य्यादया प्रतियोगित्वमवगाहते। नञादिपदानां यद्धर्मविशिष्टवैशिष्ट्यावगाहित्वोपस्थाप्याभावधर्मिकान्वयबोधजनकत्वं तद्धर्मावच्छिन्नप्रतियोगित्वेन प्रतियोगितासंसर्गधीजनकत्वव्युत्पत्तेरियान् तु विशेषः। यत्र घटो नास्ति इत्यादिशाब्दबोधे सांसर्गिकप्रतियोगित्वावगाहित्वाप्रसिद्धत्वेन घटत्वाद्यवच्छिन्नप्रतियोगित्वेनैव प्रतियोगिता निरूपिता पीतः शङ्खो नास्तीत्यादौ तु पीतशङ्खत्वावच्छिन्ना प्रतियोगितात्वेन अप्रसिद्धेनैव इत्यादिकं बहुतरम् ऊहनीयम्।

इति श्रीजगदीशतर्कालङ्कारविरचिता शिरोमणिकृतव्याप्तिपञ्चकव्याख्याया विवृतिः समाप्ता।

---

# अथ शिरोमणिकृतव्याप्तिपञ्चकव्याख्याया गादाधरी विवृतिः।

सर्वमिदमनुमानप्रामाण्यव्यवस्थापकयुक्तिप्रदर्शनं व्याप्तिनिश्चये सति इति अन्वयः स एव व्याप्तिनिश्चय एव न सम्भवति न उत्पत्तुमर्हति उपायाभावात् निश्चायकाभावात् अनुमानप्रामाण्योपपादकतया व्याप्तिग्रहोपायस्यैव इदानीमभिधातुमुचितत्वात् वक्ष्यत इत्यनेन तत्प्रतीज्ञां विधाय व्याप्तिस्वरूपनिरूपणमयुक्तमित्याशङ्कां परिजिहीर्षुस्तत्प्राथम्ये तस्य व्याप्तिग्रहोपायप्रतिपादनौपयिकत्वरूपबीजं दर्शयन् ननु इत्यादिग्रन्थमवतारयति समारब्धेति। व्याप्तिग्रहोपायकथनेन प्रामाण्यव्यवस्थापनस्य अनिष्पन्नत्वात् समारब्धेति परीक्षाविशेषणं, परीक्षा परमतनिराकरणपूर्वकस्वमतव्यवस्थापनम्। कारणीभूतेति। प्रति-

पादनविशेषणं, यद्यपि व्याप्तिग्रहोपायप्रतिपादनस्य अनुमानप्रामाण्यव्यवस्थापकत्वकथनं न तस्य आवश्यकत्वप्रदर्शनाय व्याप्तिग्रहोपायस्य वक्ष्यते इत्येतत् ग्रन्थावतारणातो व्याप्तिग्रहोपायस्यानुमानप्रामाण्योपपादकतालाभेनैव तल्लाभात् तथापि प्रामाण्यव्यवस्थापननिर्वाहकतया भवतु व्याप्तिग्रहोपायस्य इदानीमाकाङ्क्षितत्वम् एवमपि तत्र व्याप्तिस्वरूपनिरूपणं विना सम्भवतीति प्रथमत एतदेवोचितमित्येतत् सूचनाय तदभिहितं निदानमिति। व्याप्तिघटकीभूताव्यभिचारांशभाने वाधाभावमुद्रया व्यभिचारज्ञानाभावो हेतुः साध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकांशग्रहे च विशेषणज्ञानमुद्रया सहचारग्रहो हेतुरिति क्रमेण व्याप्तिग्रहोपायप्रतिपादनस्य व्याप्तिस्वरूपमप्रतिपाद्याशक्यत्वादिति भावः। प्रथमतः पूर्वपक्षस्यैव अभिधानेन निरूपयतीत्यसङ्गतमत आरभते इत्युक्तम्, निरूपणस्य परमतनिराकरणपूर्वकसिद्धान्तकथनरूपतया पूर्वपक्षाभिधानतत्खण्डनयोरपि तदारम्भ इति ध्येयम्। मूले "न तावदव्यभिचरितत्वमिति" व्याप्तिरिति प्रश्नस्थमनुषज्जते तथा च अव्यभिचारपदार्थो नानुमितिजनकज्ञानविषय इत्यर्थः। अनुमितिजनकत्वं नाव्यभिचारपदार्थावच्छिन्नहेतुविषयताघटितधर्मावच्छिन्नमिति पर्य्यवसितम् अत्र हेतुमाह, "तद्धि न साध्याभाववदवृत्तित्व"मित्यादि, हि यतः साध्याभाववदवृत्तित्वादिरूपं तदव्यभिचरितत्वं न व्याप्तिरित्यनुषङ्गेनान्वयः। तथा च साध्याभाववदवृत्तित्वादिरूपा ये ये अव्यभिचारपदार्थाः तत्तदवच्छिन्नहेतुविषयताघटितधर्मावच्छिन्नत्वाभावकूटवत्त्वादिति निरुक्तपर्य्यवसितसामान्याभावसाधकः फलितो हेतुः। न च अप्रयोजकत्वं विशेषाभावकूटस्य सामान्याभावव्याप्यतायाः अविवादात् तत्र साध्याभाववदवृत्तित्वादिरूपा ये पञ्चाव्यभिचारपदार्थाः तदवच्छिन्न-

हेतुविषयताघटितधर्मावच्छिन्नत्वाभावस्य प्रत्येकसाधकहेतुत्वं वक्ष्यति "केवलान्वयिन्यभावादिति" साध्येऽत्यन्ताभावाप्रतियोगित्वान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपकेवलान्वयित्वग्रहदशायाम् अत्यन्तान्योन्याभावयोः साध्यतदवच्छिन्नप्रतियोगिकत्वभानासम्भवेन प्रतियोगितया साध्यतदाश्रयविशेषितात्यन्तान्योन्याभाववदवृत्तित्वत्वावच्छिन्न-विषयतायास्तादृशविशेषोयानुमितिजनकज्ञानेऽभावादित्यर्थः। एवञ्च तादृशविषयताशून्यवृत्तित्वमेवानुमितिजनकतायां दर्शितसाध्यसाधको हेतुरिति नासिद्ध्यादिः दृष्टदिशा अग्रिमहेतवोऽपि परिष्करणीयाः। दीधितौ अव्याप्येति कपिसंयोगी एतद्वृक्षत्वादित्यादौ इत्यर्थः। अव्याप्तिमिति। तत्र हेत्वधिकरणे एतद्वृक्षादौ अन्यदेशकालावच्छेदेन कपिसंयोगाद्यभावसत्त्वादिति भावः। साध्यवद्भिन्नो यः साध्याभाववान् इति कर्म्मधारये अभेदसम्बन्धेन साध्यवद्भिन्नीयं यत् साध्याभावाधिकरणं तदवृत्तित्वमर्थः स्यात् तथा सति तद्घटकीभूतस्याभेदसम्बन्धेन साध्यवद्भिन्नीयं यत् तदवृत्तित्वस्यैव लक्षणत्वसम्भवात् साध्याभाववत्त्वांशवैयर्थ्यमतः सप्तमीतत्पुरुषं व्याचष्टे साध्यवद्भिन्न इति। तथा च साध्यवद्भिन्नवृत्तिर्यः साध्याभावस्तद्वदवृत्तित्वमर्थः। तत्र साध्यवद्भिन्नीयावृत्तित्वादेर्न लक्षणघटकताऽवृत्त्यादिविशेषणतया साध्यवद्भिन्नस्य अनिवेशादिति। न साध्याभावांशवैयर्थ्यमिति भावः। अभावे साध्यीयत्वानिवेशे ह्रदादिवृत्तिगगनाद्यभाववति पर्वतादौ धूमादेर्वृत्तेरसम्भव इति तद्वारणाय साध्यपदसार्थक्यम्। न चाधिकरणभेदेन अभावभेदमत एव एतल्लक्षणकरणात् पर्वतादेर्न ह्रदादिवृत्त्यभाववत्त्वमिति वाच्यम्? अव्याप्यवृत्तिप्रतियोगिकाभावस्य व्याप्यवृत्तित्वाव्याप्यवृत्तित्वरूपविरुद्धधर्माध्यासेन भेदस्यैव लक्षणकर्तृसम्मतत्वादाकाशाभावादेर्भेदकाभावेन तस्यैक्यात् अत एव उक्तधर्माणां भेदकत्वम्

एतानि च न भेदकानि इत्यनेन दीधितिकृत् तन्निरस्यति। अथवा साध्याभावपदमनुयोगितासम्बन्धेन साध्यीयपरम् अभावीयविलक्षणानुयोगितालाभायैव अभावपदं न तु अभावत्वमपि निविशते प्रयोजनाभावात् तादृशविलक्षणसम्बन्धेन यः साध्यीयः तद्वदवृत्तित्वमित्येवार्थः। अत्र च साध्यस्य यत्पदार्थाविशेषणत्वे ह्रदादिवृत्तिप्रमेयत्वादिमति पर्वतादौ हेतोर्वृत्तेरसम्भवः स्यादिति तन्निवेशः। अत्र च साध्याभावः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको बोध्यः। अन्यथा वह्निमान् धूमात् इत्यादौ ह्रदादिनिष्ठमहानसीयवह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभावस्य धूमवति सत्त्वेन पृथिवीत्वाभावद्रव्यत्वाभावान्यतरवान् जलत्वात् इत्यादौ साध्यवद्भिन्नपृथिव्यादिनिष्ठद्रव्यत्वात्मकसाध्यप्रतियोगिकाभावस्य जलादौ सत्त्वेन चाव्याप्त्यापत्तेः साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेनापि प्रतियोगिता विशेषणीया अन्यथा समवायादिसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्याद्यभावस्य धूमादिमत्यपि वृत्तेरसम्भवस्य कालिकसम्बन्धेन द्रव्यत्वाभावादौ साध्ये कालत्वादिहेतौ साध्यवद्भिन्नपरमाणुगगनादिवृत्तिदैशिकविशेषणतासम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावात्मकद्रव्यत्वादेर्हेत्वधिकरणवृत्तित्वेनाव्याप्तेर्वा प्रसङ्गात्। अत्र साध्याभाववत्तायां सम्बन्धविशेषावच्छिन्नत्वानिवेशे वह्निमान् धूमात् इत्यादौ ह्रदादिवृत्तिवह्न्याद्यभावस्य कालिकादिसम्बन्धेन पर्वतादौ वृत्तेरव्याप्तिः दैशिकविशेषणतावच्छिन्नत्वनिवेशे कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावादौ दैशिकविशेषणतया साध्ये आत्मत्वादिहेतौ साध्यवद्भिन्नकालादिवृत्तेराकाशाभावात्मकसाध्याभावस्य आत्मादिषु वृत्तेर्घटत्वाभावादिसाध्यकसद्धेतौ साध्याभावस्य घटत्वादेर्दैशिकविशेषणतासम्बन्धेन वृत्तितायां मानाभावेन च अव्याप्तिरतः साध्यतावच्छेदकसम्बन्धेन साध्य-

वत्ताज्ञानं प्रति यादृशसम्बन्धेन स्वप्रकारकनिश्चयः प्रतिबन्धकः तेनाभाववत्त्वं निवेश्यं संयोगेन वह्न्यादौ साध्ये तादृशसम्बन्धो दैशिकविशेषणताकालिकसम्बन्धेन आकाशाभावाभावे दैशिकविशेषणतया साध्ये कालिकसम्बन्ध एव तथा समवायेन घटत्वादेरभावे दैशिकविशेषणतया साध्ये समवायादिरेव इति न दोषः। न चैवं वृक्षनिष्ठायाः कपिसंयोगाभावीयमूलावच्छिन्नविशेषणता तादृशसम्बन्धेन वृक्षादौ तादृशाभाववत्ताज्ञाने अपि संयोगवत्ताज्ञानोत्पत्तेः तादृशसम्बन्धो न लक्षणघटक इति साध्यवद्भिन्नवृत्तित्वमभावविशेषणं व्यर्थमिति वाच्यम्? संयोगतदभावयोरविरुद्धत्वज्ञानाभावदशायां वृक्षः कपिसंयोगाभाववान् इति ज्ञानस्यापि वृक्षे संयोगवत्ताज्ञानविरोधितया वृक्षनिष्ठतदभावीयविशेषणताया अपि साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकीभूतसंसर्गत्वाश्रयत्वात्। केचित्तु साध्यात्मकस्वाभावनिरूपितप्रतियोगितावच्छेदकसम्बन्धेन साध्याभाववत्त्वं विवक्षितं स च सम्बन्धो यत् सम्बन्धावच्छिन्नप्रतियोगिताकस्वाभावः साध्यमिति नोक्तानुपपत्तिः। अथ समवायेन प्रमेयत्वावच्छिन्नसाध्यकद्रव्यत्वादिप्रकारकप्रमाविशेष्यत्वादिहेतुकस्थले कालिकादिसम्बन्धस्यापि तत् सम्बन्धावच्छिन्नप्रतियोगिताकघटाभावरूपप्रमेयनिरूपितप्रतियोगितावच्छेदकत्वात् तेन सम्बन्धेन साध्याभाववति काले हेतोर्वृत्तेरव्याप्तिः न च साध्यनिरूपितस्वनिष्ठप्रतियोगितावच्छेदकसम्बन्धनिवेशान्नायं दोषः। कालिकसम्बन्धावच्छिन्नघटाभावादिरूपप्रमेयस्य कालिकसम्बन्धावच्छिन्नप्रतियोगिताया घटादौ एव सत्त्वात् कालिकसम्बन्धस्य समवायसम्बन्धावच्छिन्नप्रमेयाभावात्मकस्वनिष्ठप्रतियोगितावच्छेदकसम्बन्धत्वविरहादिति वाच्यम्? तादृशप्रमेयाभावस्य कालिकसम्बन्धावच्छिन्नप्रतियोगिताको योऽभावस्तस्यापि प्रमेयत्वेन

साध्यतया तन्निरूपिततादृशप्रमेयाभावरूपस्वनिष्ठप्रतियोगितावच्छेदकत्वस्य कालिकसम्बन्धेऽक्षततया अव्याप्तेर्दुर्वारत्वात् न च यावत् साध्यनिरूपितप्रतियोगिता निवेशनीया तथा च दर्शिताभावात्मकयत्किञ्चित्प्रमेयनिरूपितस्वनिष्ठप्रतियोगितावच्छेदककालिकसम्बन्धमादाय न दोष इति वाच्यम्? असमवेतप्रमेयस्य समवायसम्बन्धावच्छिन्नप्रमेयाभावो नास्तीति-प्रतीत्यविषयतया तस्य तादृशप्रमेयाभावाभावत्वे मानाभावात् तादृशप्रमेयाभावनिष्ठयावत् प्रमेयनिरूपितप्रतियोगित्वाप्रसिद्ध्या उक्तस्थले अव्याप्तितादवस्थ्यात् न च साध्यतावच्छेदकसम्बन्धेन वृत्तिमत् यावत् साध्यनिरूपितप्रतियोगितायाः निवेशनीयतया नोक्ता प्रसिद्धिरिति वाच्यम्? सर्वत्र समवायिनि एकया सत्तया एव तादृशाभावाभावत्वनिर्वाहे सर्वसमवाय्यसंग्राहकगुणादीनां तादृशप्रमेयाभावाभावत्वे मानाभावेन दर्शिताप्रसिद्धेर्दुर्वारत्वादिति चेत्? न, साध्यतावच्छेदकसम्बन्धेन वृत्तिमत् यत्किञ्चित् साध्यनिरूपितस्वनिष्ठप्रतियोगितावच्छेदकसम्बन्धनिवेशेनैवोपपत्तेः कालिकसम्बन्धावच्छिन्नप्रतियोगिताकस्य दर्शितसाध्याभावाभावस्य साध्यत्वेऽपि तस्य साध्यतावच्छेदकसम्बन्धेनावृत्तित्वात्। न च एवमपि कालिकसम्बन्धेन प्रमेयसाध्यककालत्वादिहेतावव्याप्तिः कालिकसम्बन्धावच्छिन्नप्रमेयाभावस्य यः कालिकसम्बन्धावच्छिन्नाभावः तस्य स्वाभावात्मकस्य प्रमेयत्वेन साध्यस्य प्रतियोगितावच्छेदकीभूतकालिकसम्बन्धेन कालिकसम्बन्धावच्छिन्नप्रमेयाभावाधिकरणे हेतोर्वृत्तेरिति वाच्यम्? तादृशप्रतियोगितावच्छेदकीभूत यत्सम्बन्धेन साध्यवद्भिन्नवृत्तित्वम् अभावस्य तत्सम्बन्धेन तद्वति अवृत्तित्वस्य विवक्षणीयत्वात् उक्तस्थले च साध्याभावस्य कालिकसम्बन्धेन साध्यवद्भिन्नेऽवृत्तेः। अथैवं तादृशप्रतियोगितायां स्वनिष्ठत्व-

निवेशो विफलः तदनिवेशे घटभिन्नं घटत्वाभावादित्यादौ भेदात्मकसाध्यनिरूपितप्रतियोगितावच्छेदकतादात्म्यसम्बन्धेन घटत्वात्मकसाध्याभाववति घटत्वे हेतोर्वृत्तेरव्याप्तिप्रसक्तावपि तादृशव्याप्तेरीदृशविवक्षयैव वारणसम्भवात् घटत्वरूपसाध्याभावस्य साध्यनिरूपितप्रतियोगितावच्छेदकतादात्म्यसम्बन्धेन साध्यवद्भिन्ने घटेऽवृत्तेः। न च एवं तादृशसाध्यस्य तादृशसम्बन्धेन साध्यवद्भिन्नवृत्तिरभाव एव अप्रसिद्धः इति कथमव्याप्तिपरीहार इति वाच्यम्? घटभेदस्य घटत्वाभावसमनियततया ऐक्यात् घटत्वेऽपि समवायसम्बन्धावच्छिन्नायास्तादृशप्रतियोगितायाः सत्वेन तादृशप्रतियोगितावच्छेदकसमवायसम्बन्धेन साध्यवद्भिन्नवृत्तिघटत्वरूपसाध्याभावस्य प्रसिद्धिसम्भवात् तादृशभावयोर्भेदे स्वनिष्ठत्वस्य प्रतियोगिताविशेषणत्वेऽपि घटत्वरूपसाध्याभावनिष्ठसाध्यनिरूपितप्रतियोगित्वाप्रसिद्ध्या तद्दोषतादवस्थ्यात् संयोगिभेदस्य व्याप्यवृत्तित्वाव्याप्यवृत्तित्वरूपवैधर्म्येण संयोगाभावाभेदासम्भवेऽपि संयोगवत्त्वप्रमाविषयत्वाभावाभेदे बाधकाभावात् स्वरूपसम्बन्धस्यापि साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धतया तेन सम्बन्धेन साध्यवद्भिन्नवृत्तेस्तादृशप्रमाविषयत्वरूपसाध्याभावस्य प्रसिद्ध्या संयोगिभिन्नं गुणत्वादित्यादावव्याप्त्यनवकाशात् इति चेत्? न, प्रतियोगितायां स्वनिष्ठत्वानिवेशे कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावे साध्ये आत्मत्वादावव्याप्तेर्दुर्वारत्वात् तादृशसाध्यस्य यत् कालिकसम्बन्धावच्छिन्नाभावः दैशिकसम्बन्धावच्छिन्नतदभावस्य तादृशसाध्यरूपतया दैशिकविशेषणतासम्बन्धस्य साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धत्वात् तेन सम्बन्धेन आकाशाभावरूपसाध्याभावस्य साध्यवद्भिन्ने हेतुमति च वृत्तेः प्रतियोगितायां स्वनिष्ठत्वनिवेशे च दैशिकविशेषणतायाः आकाशाभावनिष्ठसाध्यनिरूपितप्रतियोगिताव-

च्छेदकसम्बन्धत्वविरहेण अव्याप्तेरनवकाशात् न च साध्यनिरूपितस्वनिष्ठप्रतियोगितानिवेशे साध्याभावपदोपादानवैयर्थ्यम् अभावान्तरनिष्ठप्रतियोगितायाः साध्यनिरूपितत्वविरहेणैव तद्व्यावृत्तेरिति वाच्यम् ? स्वपदार्थस्य द्विधा निवेशेन साध्याभावनिष्ठसाध्यीयप्रतियोगितावच्छेदकसम्बन्धेन साध्याभाववत्त्वनिवेशप्रौव्येण तत्पदवैयर्थ्यानवकाशात् तादृशसम्बन्धेन साध्यवद्भिन्नवृत्ति यत्तद्वत्त्वमात्रनिवेशे साध्यवद्भिन्नवृत्त्यभावान्तरवति हेतौर्वृत्त्या अनुपपत्तेरित्याहुः। अत्र इदं बोध्यं साध्यवत्त्वग्रहविरोधिग्रहविषयसम्बन्धत्वेन साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धत्वेन वा नानुमित्यौपयिकव्याप्तिशरीरेऽभावसम्बन्धनिवेशसम्भवः साध्यभेदेन व्याप्तेर्भेदात् लाघवेन तत्तत्साध्यकस्थले दैशिककालिकसमवायादिसम्बन्धानामेव विशिष्याभावसम्बन्धतया निवेशौचित्यात् गुरुरूपेण विशेषणतादीनां सम्बन्धताया अत्यन्ताप्रामाणिकतया तद्रूपावच्छिन्नत्वस्य सम्बन्धविषयाव्याप्तिघटकत्वायोगाच्च परन्तु यादृशसाध्यकस्थले यादृशः सम्बन्धोऽभावसम्बन्धतया व्याप्तिघटकस्तत्परिचयायैव दर्शितोऽयः तथा च यादृशसम्बन्धेन साध्यवति तद्भिन्नवृत्तिसाध्याभावो न वर्त्तते तादृशसम्बन्धेन तद्वत्त्वं निवेश्यमित्युक्तौ तत्परिचयसम्भवात् अलं वाग्जालेन। साध्याभाववत्पदेन साध्याभावत्वविशिष्टाधिकरणं विवक्षणीयं तेन गुणान्यत्वविशिष्टसत्ताभाववान् गुणत्वादित्यादौ विशिष्टस्य अनतिरिक्ततया साध्याभावस्य गुणादौ सत्त्वेऽपि न क्षतिः गुणे गुणान्यत्वविशिष्टसत्ताभावो नास्तीति प्रत्ययात्। तत्र तादृशाभावत्वविशिष्टाधिकरणत्वानभ्युपगमात्। अथैतल्लक्षणे घटत्वघटाकाशसंयोगान्यतराभाववान् आकाशत्वादित्यादावव्याप्तिः घटत्वस्य व्याप्यवृत्तितया तद्घटितान्यतराभाववद्भिन्ने घटे वर्त्तमानस्य घटाकाशसंयोगात्मक-

साध्याभावस्य द्रव्याधिकरणे गगनेऽपि वृत्तेः निरवच्छिन्नसाध्या-भाववत्तानिवेशे च साध्यवद्भिन्नत्वांशवैयर्थ्यात् इति चेत्? न, एतल्लक्षणकर्तृमते स्वप्रतियोगिसामानाधिकरण्यस्वप्रतियोगि-वैयधिकरण्यविरुद्धधर्माध्यासोऽभावभेदक इत्येतादृशयुक्त्या द्रव्य-वृत्तिसंयोगाभावगुणवृत्तिसंयोगाभावयोर्भेदसिद्धिरित्यव्याप्यवृत्ति-साध्यकस्थलेऽव्याप्तिः समाधीयते तथा च घटाकाशसंयोगस्य उक्तान्यतराभावप्रतियोगित्वेऽपि न तदभावता तथा च सति तादृशधर्मयोः समावेशापत्तेः तयोर्विरोधाभावे संयोगाभावस्यापि अधिकरणभेदेन भेदासिद्धेरव्याप्यवृत्तिसाध्यके सर्वत्रैव अव्याप्ते-रेतदभिप्रायेण लक्षणान्तरस्य आदरणीयत्वादिति गगनेऽतिरिक्त एव तदभावः स्वीकरणीयः स च न साध्यवद्भिन्नवृत्तिरिति न दोषः। साध्यवद्भिन्ने वर्त्तते इत्यनेन अनवच्छिन्नाया एव वृत्ते-र्विवक्षणात् न घटाकाशसंयोगात्मकाभावमादाय दोष इति तु न युक्तं तथा सति सुषुप्त्यादिकालावच्छेदेन अस्मदात्मवृत्तौ स्वाश्रयाश्रयत्वसम्बन्धावच्छिन्नप्रतियोगिताकज्ञानत्वाद्यभावे साध्ये सुखादावव्याप्तिस्तत्र साध्यवद्भिन्ने ईश्वरे तादृशसम्बन्धेन निरव-च्छिन्नवृत्तिकज्ञानत्वादिरूपाभावस्य तेन सम्बन्धेन सुखाद्यधि-करणे अस्मदाद्यात्मनि अपि वृत्तेरुत्पत्तिकालावच्छिन्नघटादिवृत्ति-तादृशसम्बन्धावच्छिन्न-प्रतियोगिताकसत्ताभावादिसाध्यकघटत्वा-दिहेतावव्याप्तिश्च, संयोगाभावनिष्ठयोर्व्याप्यवृत्तित्वाव्याप्यवृत्ति-त्वयोः प्रतियोगिसामानाधिकरण्यप्रतियोगिवैयधिकरण्ययोः वक्ष्यमाणरीत्या न विरोधः इति अव्याप्यवृत्तिसाध्यकस्थले अव्याप्त्या लक्षणान्तरमवतारयति, कर्मादाविति। इदन्त्ववधेयं द्रव्यवृत्ति-संयोगाभावो न गुणादौ स्वीक्रियते अपि तु क्लृप्ते तद्वृत्तिसंयोग-वत्त्वप्रकारकप्रमाविषयत्वाद्यभाव एव संयोगाद्यभावत्वं कल्प्यते अनन्तगुणाद्यधिकरणे संयोगाभावकल्पनामपेक्ष्य तथाविधैका-

भावे संयोगाद्यभावत्वकल्पने लाघवात् न च संयोगवत्त्वप्रकारक-प्रमाविषयत्वाद्यभावे द्रव्यत्वाभावद्रव्यभेदसंयोगिभेदादौ वा संयोगाभावत्वं कल्प्यते इत्यत्र विनिगमकाभाव इति वाच्यम्? तादृशाभावानां समनियततया अभेदात् एवञ्च द्रव्यवृत्तिसंयोगा-भावगुणवृत्तिसंयोगाभावयोर्भेदः सप्रमाण एव अथैवं द्रव्यत्वा-भावादीनां अप्यानन्त्यापत्तिः कर्मादौ गुणवृत्तिद्रव्यत्वाभावो न कल्प्यते अपि तु तद्वृत्तिद्रव्यगुणान्यतरत्वाभाव एव तदभावत्व-मित्यादितर्कगवेषणया कर्मादिवृत्तिद्रव्यत्वाभावस्य गुणादिवृत्ति-तदभावतो भेदसिद्धिरिति चेत्? इष्टमेवैतत् अधिकरणभेदेन अभावभेदवादिनाम्। नचैवं संयोगाभावत्वकल्पनायां धर्मि-णामप्यानन्त्यादुक्तविनिगमकाभावसम्भव इति वाच्यम्? विनिगम-नाविरहेऽपि द्रव्यत्वाभावे संयोगाद्यभावत्वकल्पनाया निष्प्रत्यूह-त्वात् इति हेतोरिति। नानाधिकरणस्य इत्यादि अव्याप्तेरिति एतद्रूपवान् एतद्रसादित्यादौ एतद्रसाधिकरणे एतद्रूपाधिकरणस्य हित्वादिना भेदसत्वेऽपि व्यासज्यवृत्तिधर्मानवच्छिन्नत्वेन साध्यव-न्निष्ठप्रतियोगितायाः प्रतियोग्यवृत्तित्वेन वा भेदस्य विशेषितत्वे लक्षणगमनसम्भवेन असम्भवो दर्शितः। साकल्यमिति बोध्य-मित्यस्य विशेषणमित्यादिः अत्र साध्याभाववति साकल्यविशे-षणासत्व एव साध्ये तद्विशेषणव्यावृत्तिः सङ्गच्छते अन्यथा साध्याभाववत्ताया हेतुमत्साधारण्येऽपि साध्याभाववद्यत्किञ्चिद्-व्यक्तिनिष्ठाभावप्रतियोगित्वमादाय नानाव्यक्तिसाध्यकसद्धेतौ लक्षणसमन्वयसम्भवादतः साध्ये तदभाववति च इत्यनुक्ता-साध्याभाववति साकल्यविशेषणं प्रथमतो दर्शितं न च साध्या-भाववति साकल्यविशेषणासत्त्वेऽपि वह्निमान् पर्वतान्यत्वादि-त्यादावतिव्याप्तिवारणमेव साध्ये साकल्यविशेषणप्रयोजनमस्ति उभयत्र साकल्यविशेषणादाने यत्किञ्चित् साध्याभाववति पर्वते

हेत्वभावसत्त्वे नातिव्याप्तिः साध्ये साकल्यविशेषणसत्त्वे ह्रदादे-रेव सकलसाध्याभाववत्तया हेतुमत्त्वेन अतिव्याप्त्युद्धारादिति नोक्ताभिप्रायवर्णनं सम्यगिति वाच्यम्। साध्याभाववति साकल्यविशेषणासत्त्वे साध्ये साकल्यविशेषणस्य उक्तातिव्याप्ति-वारणप्रयोजनकत्वसम्भवेऽपि वक्ष्यमाणप्रयोजनस्यैव वास्तविक-तया तस्य साध्याभाववति साकल्यविशेषणसत्त्व एव सङ्गतेरादौ तत्प्रदर्शनस्य उचितत्वात्। वस्तुतस्तु साध्ये साकल्यविशेषणं परित्यज्य साध्याभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिता-कत्वरूपकल्पान्तरस्य अवलम्बनीयतया चरममेव तत्प्रदर्शन-मुचितं साध्ये तदभाववति च बोध्यमित्युक्ता साध्यतावच्छेदका-वच्छिन्नप्रतियोगिताको वा अभावो ग्राह्य इत्युक्तौ साध्याभाव-वति च साकल्यं निवेश्यते साध्याभावो वा एतादृशो निवेश्यते इत्येतादृशो विकल्पः प्रतीयते स चाविवक्षित इति सारम्। साध्याभावे साकल्यविशेषणे धूमवान् वह्नेरित्यादौ साध्यताव-च्छेदकीभूतसंयोगसम्बन्धावच्छिन्न प्रतियोगिताकसकलसाध्या-भावाधिकरणं गुणादिरेव स्यात् अयोगोलकादेर्धूमसंयुक्तत्वाव-च्छिन्नाभावानधिकरणत्वादित्यतिव्याप्ति-र्वह्निमत्त्वप्रकारक-प्रमा-विषयो धूमादित्यादौ साध्यतावच्छेदकीभूतस्वसम्बन्धावच्छिन्न-प्रतियोगिताकतत्तद्विपक्षावृत्तित्वावच्छिन्नाभावस्य तत्तद्विपक्ष-मात्रवृत्तितया सकलसाध्याभावाधिकरणाप्रसिद्धा अव्याप्तिश्चेति तदुपेक्षय साध्ये साकल्यविशेषणं निवेशितम्। ननु साध्ये साकल्य-विशेषणदानेऽपि वह्निमान् धूमादित्यादावव्याप्तितादवस्थ्यं पर्व-तादावपि पर्वतीयवह्नेर्विरत्वादिना अभावस्य सत्त्वेन सकल-साध्याभावसत्त्वात् व्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वेन अभावविशेषणे च वह्निधूमोभयवान् वह्नेरित्यादावतिव्याप्तिः। वह्निमतस्तथाविधसाध्याभावानधिकरणत्वात् साध्यतावच्छेद-

कातिरिक्तो यो व्यासज्यवृत्तिधर्मस्तदनवच्छिन्नप्रतियोगिताकत्व-निवेशे च लाघवात् साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्व-मभावे विशेषणमुचितं किं साध्ये साकल्यविशेषणेन इत्यभिप्रेत्य तथैवाह साध्यतावच्छेदकेति। साध्याभाववति साकल्यविशेषण-प्रयोजनमाह, विपक्षेति। वैकल्पिकयोः साध्यतदभावयोः साकल्यसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वविशेषणयोर्व्या-वृत्तिमाह, न वेति। एकव्यक्तिसाध्यके एतद्रूपवान् एतद्रसा-दित्यादौ हेत्वधिकरणे पूर्वक्षणवृत्तित्वविशिष्टसाध्याभावो न प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणपूर्वक्षणवृत्तित्व-विशिष्ट एतद्रूपादेरेतद्रसाधिकरणे वृत्तेः एतद्रूपतद्रूपोभयत्वा-वच्छिन्नाभावोऽपि न तथा प्रतियोगितावच्छेदकावच्छिन्नाधि-करणाप्रसिद्धेरिति तत्र लक्षणसङ्गतिरित्यतो नानाव्यक्तिसाध्यक इत्युक्तम् अतएव अव्याप्तिरेवोक्ता नासम्भव इति अत्र नानाव्यक्ति-साध्यकत्वं व्यधिकरणद्वयवृत्तिसाध्यतावच्छेदकत्वम् अतएव एत-द्व्यक्तिवृत्तियावद्धर्मवान् एतद्रसादित्यादौ नानाव्यक्तिसाध्यके अव्याप्तिविरहेऽपि न क्षतिः अव्याप्यवृत्तीति। कपिसंयोगि एतत्त्वादित्यादावित्यर्थः अव्याप्तेर्वारणायेत्यन्वयः व्यभिचारिणि चेति पृथिवी कपिसंयोगादित्यादावित्यर्थः। अभावद्वये साध्या-भावे हेत्वभावे च तथा चाव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिसद्धेतोर-व्याप्तेर्वारणाय साध्याभावे व्यभिचारिणि च अव्याप्यवृत्तावतिव्याप्ते-र्वारणाय हेत्वभावे प्रतियोगिवैयधिकरण्यमित्यर्थः। यद्यपि हेत्व-भावे प्रतियोगिवैयधिकरण्यस्य आवश्यकतया कपिसंयोगो कपि-विभागादित्याद्यव्याप्यवृत्तिहेतुकेऽव्याप्तिवारणप्रयोजनत्वं साध्या-भावे तद्विशेषणस्य सम्भवतीति व्याप्यवृत्तीत्यकिञ्चित्करं तथापि हेत्वभावे तादृशविशेषणप्रतिसन्धानं विनैव व्याप्यवृत्ति-हेतुकस्थले अव्याप्तिनिर्णयो भवतीत्येतदभिसन्धायैव तदुक्तं प्रति-

योगिवैयधिकरण्यञ्च न प्रतियोग्यधिकरणावृत्तित्वम् अव्याप्यवृत्तिसाध्यके तथाविधहेतुके च तादृशसाध्याभावहेत्वभावाप्रसिद्धा अव्याप्तेरपि तु प्रतियोग्यनधिकरणवृत्तित्वं तथा च प्रतियोग्यनधिकरणवृत्तित्वविशिष्टसाध्याभावाधिकरणेषु यावत्सु प्रतियोग्यनधिकरणवृत्तित्वविशिष्टः सन् वर्त्तते योऽभावस्तत् प्रतियोगित्वमर्थः। तेन कपिसंयोगी एतद्वृक्षत्वादित्यादौ कपिसंयोगाद्यनधिकरणगुणादिवृत्तित्वोपलक्षितकपिसंयोगाद्यभावस्य हेत्वधिकरणे सत्त्वेऽपि न अव्याप्तिर्न वा एतद्वृक्षत्ववान् कपिसंयोगादित्यादौ तथाविधकपिसंयोगाद्यभावस्य सकलसाध्याभावाधिकरणे सत्त्वेऽपि अतिव्याप्तिः प्रतियोग्यनधिकरणीभूतसाध्याभावाधिकरणयावन्निष्ठस्वप्रतियोग्यनधिकरणताकाभावप्रतियोगित्वमिति फलितार्थः। प्रथमे साध्यतावच्छेदकसम्बन्धेन चरमे हेतुतावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वं बोध्यं तेनायमात्मा आत्मत्वाकालान्यतरत्वात् इत्यादौ व्यभिचारनिरूपकाधिकरणस्य कालस्य कालिकसम्बन्धेन साध्याधिकरणत्वेऽपि नातिव्याप्तिर्न वा वह्निमान् धूमादित्यादौ साध्याभावाधिकरणयावदन्तर्गतकालज्ञानादिषु कालिकविषयित्वादिसम्बन्धेन हेत्वभावप्रतियोग्यधिकरणत्वेऽपि असम्भवः अव्याप्तिर्वा इत्यस्व प्रतियोगित्वे सम्बन्धविशेषावच्छिन्नत्वेन न निवेशनीये सम्बन्धान्तरावच्छिन्नप्रतियोगिताकयोः साध्याभावहेत्वभावयोरुक्तसम्बन्धेन प्रतियोगिसमानाधिकरणतया असम्भवाव्याप्त्योरनवकाशात् हेत्वभावोऽपि इत्यपि शब्देन साध्याभावेऽपि प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यं निवेश्यम् इति सूच्यते, तेन विशिष्टसत्तावान् जातेरित्यादौ हेत्वधिकरणगुणादिषु साध्याभावप्रतियोगिसत्त्वादेः सत्त्वेऽपि नातिव्याप्तिः अत्र साध्याभावोऽपि इत्युक्तौ अपिमतत्पदेन हेत्वभावपरामर्शासम्भवः तत्र हेत्वभावपददाने

चानुराधिक्यमिति तन्नोक्तं तत् प्रतियोगित्वं साध्याभाववन्निष्ठा-भावप्रतियोगित्वं हेतुतावच्छेदकरूपेण हेतुतावच्छेदकावच्छिन्न-मित्यर्थः। हेत्वभावनिष्ठप्रतियोगिवैयधिकरण्यशरीरे प्रतियोगि-तावच्छेदकावच्छिन्नत्वनिवेशप्रयोजनमाह, द्रव्यत्वादाविति। विशिष्टेति गुणकर्मान्यत्वविशिष्टेत्यर्थः। प्रतियोगितायां हेतु-तावच्छेदकावच्छिन्नत्वनिवेशप्रयोजनमाह न वेति। अत्रापि द्रव्यत्वादौ साध्ये इत्यनुषज्यते विशिष्टसत्तात्वादिना गुणकर्मा-न्यत्वविशिष्टसत्तात्वादिना, तृतीयार्थश्चावच्छिन्नप्रतियोगिताकत्वं तस्य च अभावे अन्वयः प्रतियोगिपदार्थैकदेशप्रतियोगित्वा-न्वितं अवच्छिन्नत्वं वा तदर्थः, तादृशाभावेति सकलसाध्या-भाववन्निष्ठाभावेत्यर्थः। न च हेत्वभावे प्रतियोगिताव-च्छेदकावच्छिन्नवैयधिकरण्यस्थले हेतुतावच्छेदकावच्छिन्न-वैयधिकरण्यमेव निवेश्यतां ततोऽपि तत्प्रयोजननिर्वाहात्, तथा च द्रव्यं सत्त्वादित्यादौ गुणादिनिष्ठविशिष्टसत्ता-भावस्य हेतुतावच्छेदकावच्छिन्नसमानाधिकरणतयैवातिव्याप्ति-वारणसम्भवात् प्रतियोगितायां हेतुतावच्छेदकावच्छिन्नत्वनिवे-शनमफलमिति वाच्यम्? हेत्वभावे हेतुतावच्छेदकावच्छिन्न-वैयधिकरण्यनिवेशे सकलसाध्याभाववन्निष्ठाया, हेतुताव-च्छेदकावच्छिन्नानधिकरण-वृत्तित्वविशिष्ट-निरूपिताधिकरणता तन्निरूपकाभावप्रतियोगित्वमित्यर्थः स्यात् तदपेक्षया सकल-साध्याभाववन्निष्ठा हेतुतावच्छेदकावच्छिन्नयादृशप्रतियोगिता-वच्छेदकावच्छिन्नानधिकरणता तद्वत्त्वरूपस्यास्मदीयफलितार्थ-स्यागुरुत्वात् न च ममापि सकलसाध्याभाववन्निष्ठं यद्धर्मा-वच्छिन्नानधिकरणत्वं तद्धर्मवत्त्वमित्येवार्थः स च अतिलघु-रेवेति वाच्यम्? एतादृशार्थकरणे मूलोक्तप्रतियोगिताया व्याप्तित्वं व्याहन्येत इति मूलानुसारेण दीधितिकृता सुबर्थ-

स्यानुसरणात् उक्तविशेषणविशेष्यभावेन निवेशे व्यर्थविशेषणतानवकाशात् । केचित्तु हेतुतावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशे सकलसाध्याभाववन्निष्ठविशिष्टसत्तात्वावच्छिन्नव्यधिकरणाभावप्रतियोगित्वरूपव्याप्तिविशिष्टवैशिष्ट्यज्ञानस्य गुणेऽपि सत्त्वात् बाधानवतारदशायां तत्र द्रव्यत्वानुमित्युपपत्तिः अस्मन्मते तु तत्प्रतियोगित्वस्येत्यतो न बाधस्य तादृशप्रतियोगितावच्छेदकहेतुतावच्छेदकस्वव्याप्तितया तद्विशिष्टवैशिष्ट्यज्ञानस्य गुणे च सत्वादित्याहुः । एतल्लक्षणं दूषयित्वा परलक्षणमवतारयति यत्रैकव्यक्तिकमिति । यत्रैकव्यक्तिकं साध्यं तत्राव्याप्तिरित्यन्वयः एतद्रूपवान् एतद्रसादित्यादौ अनेकाशेषत्वरूपसाकल्यस्य साध्येऽसत्वादिति भावः । साध्ये साकल्यविशेषणं परित्यज्य कल्पान्तरानुसरणायैतद्दोषावकाश इत्यत आह विपक्षो वेति । विपक्षः साध्याभाववान् अत्राप्येकव्यक्तिक इत्यस्य विपरिणतस्यानुषङ्गः तथा च एतद्घटत्वं तद्घटत्वादित्यादौ साध्याभाववति एतद्घटादौ साकल्याप्रसिद्ध्याऽव्याप्तिरित्यर्थः । सकलपदस्य अशेषमात्रपरत्वे दोषान्तरमाह, निर्धूमत्व इति । तत्वेन निर्धूमत्वव्याप्यत्वेन, तथाच धूमत्वावच्छिन्नाभावव्याप्यवान् वह्नित्वावच्छिन्नाभावादित्यादावित्यर्थः । निर्धूमत्वत्वावच्छिन्ने साध्ये एकव्यक्तिकतया पूर्वदोषाक्रान्तत्वेन तद्व्याप्यसाध्यकानुसरणं निर्धूमत्वव्याप्यजलत्वादेस्तादृप्येण साध्यतायां सद्धेतुत्वानुपपत्तेरतस्तत्त्वेनेत्युक्तं हेत्वभावस्येति । अथ वह्न्यात्मकहेत्वभावस्य प्रत्येकं सकलसाध्याभाववन्निष्ठत्वासम्भवेऽपि सकलतन्निष्ठवह्न्याभावादिभेदमादायैव लक्षणं सङ्गमनीयं हेतुतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यनिवेशात् । यत्तु वह्निमद्भेदहेतुकाभिप्रायकोऽयं ग्रन्थः तत्र हेतुभेदमादायापि लक्षणगमनासम्भवात् भेदभेदस्यानवस्थाभयेनाधिकरणस्वरूपतया तस्य च प्रत्येक-

विश्रान्ततया यावद्विपक्षवृत्तित्वासम्भवादिति तत् न, आकाशा-भावाधिकरणकभेदभेदस्याकाशाद्यभावस्वरूपतया तस्य च याव-द्विपक्षवृत्तित्वेन तमादायैव लक्षणगमनसम्भवात् न च एतादृश-रीत्या आकाशाभावमादाय भेदहेतुकव्यभिचारिणि अतिप्रसक्त्या-हेत्वभावत्वेन सकलसाध्याभावाधिकरणवृत्तित्वं विवक्षणीयं तथा च सति अधिकरणस्वरूपाभावस्य च स्वस्मिन्नेव तदभावत्वेन वृत्तिरिति नातिव्याप्त्यवकाशः एवञ्चाकाशाभावमादाय नोक्ता-व्याप्तिपरिहार इति वाच्यं ? उक्तस्थले आकाशाभावस्य हेतु-तावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यविरहादेवातिव्याप्ति-वारणसम्भवेन तादृशविवक्षाया निष्प्रयोजनकत्वात् वह्निमद्भेद-हेतुकस्थले च साध्याभावाधिकरणस्य हेतुरूपप्रतियोग्यनधिकरण-त्वेनाकाशाभावरूपहेतुभेदस्य प्रतियोगिव्यधिकरणत्वे नाव्याप्ति-वारणसम्भवादिति दिक् । अत्र केचित् यत्र वह्न्यभावान्यत्व-विशिष्ट निर्धूमत्वव्याप्यं साध्यं वह्न्यभावान्यत्वविशिष्टवह्न्यभावो हेतुस्तत्र वह्न्यभावस्यापि सकलसाध्याभावान्तर्गततया तत्र वह्न्यभावभेदासत्वेन तमादाय लक्षणगमनासम्भवात् न च तादृशविशिष्टहेतुकस्थले हेतुभेदस्य सकलसाध्याभाववन्निष्ठत्वा-सम्भवेऽप्यखण्डस्य विशिष्टात्यन्ताभावस्य तथात्वमादायैव लक्षण-गमनं सम्भवतीति वाच्यं ? प्राचीनमते विशिष्टाभावस्य विशेष-णाभावविशेष्याभावाभ्याम् अनतिरिक्ततया तादृशविशिष्टा-भावस्य वह्न्यभावत्ववह्न्यभयरूपत्वेन सकलसाध्याभाववन्निष्ठत्वा-सम्भवात् अथैवमपि विषयितादिसम्बन्धावच्छिन्नप्रतियोगिता-कस्य वह्न्यभावात्यन्ताभावस्य अखण्डतया सकलधूमवन्निष्ठतया तमादाय एव लक्षणगमनं सम्भवतीति चेत् ? न, वृत्त्यनियाम-कतया विषयितादिसम्बन्धानामत्यन्ताभावप्रतियोगितानवच्छेद-कत्वात् संयोगादिरूपव्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताक-

वह्न्याद्यभावस्याखण्डस्य सकलधूमवन्निष्ठत्वेऽपि तदभावप्रतियोगिता न हेतुतावच्छेदकीभूतवह्न्यभावत्वावच्छिन्ना, तत्र लाघवेनाभावत्वस्यैव तदवच्छेदकत्वात् इति न तमादायापि लक्षणसङ्गतिः न च गुरुधर्मावच्छिन्नहेतुकस्थले लक्षणसङ्गमनाय पारिभाषिकमेवावच्छेदकत्वं हेतुतावच्छेदके निवेश्यं तथा च वह्न्यभावत्वादेरपि तादृशावच्छेदकत्वमक्षतमेवेति वाच्यं ? एतल्लक्षणस्य परित्याज्यतया निखिलदोषोद्धारणावश्यकत्वेन पारिभाषिकावच्छेदकत्वं न निविष्टमित्याशयेनैव तद्दोषादानादिति, तदसत्, तथा सत्यपि सकलसाध्याभाववन्निष्ठं कालिकसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावाभावमादाय लक्षणसमन्वयसम्भवात् न च जन्यमात्रस्य कालोपाधितानये साध्याभाववति पर्वतादौ कालिकसम्बन्धेन वह्न्यभावादिसत्त्वात् तत्र तादृशसम्बन्धेन तस्य भावो न वर्त्तते एवेति वाच्यं ? कालिकसम्बन्धेन तत्र वह्न्यभावसत्त्वेऽपि प्रतियोग्यनधिकरणीभूतवह्निमदवयवावच्छेदेन तत्र सत्सम्बन्धावच्छिन्नप्रतियोगिताकतदभावस्यापि सत्त्वात् एवं विशिष्टाभावस्य विशेष्याभावविशेषणाभावाभ्याम् अनतिरिक्तत्वे द्रव्यं विशिष्टसत्त्वादित्यादावेव अव्याप्तिसम्भवात्तदुपेक्षाभावसाध्यकाभावहेतुकस्थलानुधावने वीजाभावात् तस्मात् प्रतियोगितावच्छेदकसम्बन्धेनैव प्रतियोगिवैयधिकरण्यं न निविष्टं प्रतियोगिता च हेतुतावच्छेदकसम्बन्धावच्छिन्नैव निविष्टेत्यभिप्रायेणैव तद्दोषदानं हेतुतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यदाने तु अग्रिमलक्षणापेक्षया गौरवमेव तल्लक्षणावतारे वीजं बोध्यं, एतेन सकलशब्दस्य व्यापकतार्थकतया साध्याभावव्यापकीभूताभावप्रतियोगित्वमेव निष्कृष्टतल्लक्षणार्थः धूमवान् वह्नेरित्यादौ प्रमेयत्वादिना वह्न्यभावस्य साध्याभावव्यापकत्वे-

ऽपि न क्षतिः यद्रूपावच्छिन्नाभावत्वं साध्याभावव्यापकतावच्छेदकं तद्रूपत्वस्यैव लक्षणत्वात् एवञ्च हेत्वभावे प्रतियोगिवैयधिकरण्यानिवेशेन अव्याप्यवृत्तिहेतुकव्यभिचारिणि हेत्वभावस्य साध्याभाववन्निष्ठहेतुरूपाभावप्रतियोगितया व्यापकत्वाभावे नातिप्रसङ्गविरहात् व्यापकताशरीरे च हेतुतावच्छेदकसम्बन्धेन साध्याभाववन्निष्ठत्वमभावे निवेश्यं तेन वह्न्याद्यभावादिमति कालिकादिसम्बन्धेन धूमादिरूपाभावस्य वृत्तावपि धूमाभावादेर्न साध्याभावव्यापकताक्षतिः सत्तावान् जातेरित्यादौ साध्याभाववति हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्ध्या अव्याप्तिश्च लक्षणपञ्चक एव दोषः अस्तु वा हेतुतावच्छेदकसम्बन्धेन हेतुमत्तास्थानं प्रति यादृशसम्बन्धेन हेत्वभाववत्ताग्रहः प्रतिबन्धकस्तादृशसम्बन्धेन स्वावच्छिन्नाधिकरणभिन्नसाध्याभावाधिकरणकं यद्यत् स्वं तद्भिन्नत्वमेव साध्याभावव्यापकतावच्छेदकत्वम्, इत्यञ्च सत्तावान् जातेरित्यादौ एतादृशं स्वं जातित्वाभावत्वादिकमेव तद्भिन्नञ्च जात्यभावत्वमितिलक्षणसमन्वयः इत्यञ्च एतद्वृक्षत्ववान् कपिसंयोगादित्यादौ कपिसंयोगाभावत्वावच्छिन्नानधिकरणाप्रसिद्ध्या कपिसंयोगाभावत्वं नैतादृशं स्वमिति कपिसंयोगाभावत्वस्य साध्यव्यापकतावच्छेदकत्वादतिव्याप्तिवारणाय हेत्वभावे प्रतियोगिवैयधिकरण्यविशेषणं देयमेव न देयमेव वा अधिकरणत्वाभावस्य एवाधिकरणभिन्नत्वस्थले निवेशनीयत्वात् कपिसंयोगाभावादिवत्तदधिकरणताया अपि अव्याप्यवृत्तितया तदभावस्य साध्याभाववति सत्त्वे नातिव्याप्त्यनवकाशात् अधिकरणत्वाभावादिभावप्रतियोगितया अतिरिक्त एवेति विशेषणताविशेषेणैव तद्दत्त्वं साध्यभाववति निवेशनीयमिति एवञ्च निर्धूमत्वव्याप्यवान् निर्वह्नित्वादित्यादौ हेत्वभावस्य वह्न्यादेः प्रत्येकं यावद्विपक्षावृत्तित्वेऽपि हेत्वभावत्वेन तेषां साध्याभाव-

व्यापकत्वात् न अव्याप्तिः इति पूर्वपक्षोऽप्यकिञ्चित्करः यत्र यावतां साध्याभाववतां सम्भवस्तत्र प्रातिस्विकरूपेण तत्तदधिकरणवृत्तित्वमेव हेत्वभावविशेषणतया लक्षणघटकं न तु साध्याभावव्यापकत्वमित्यभिप्रायेणैव एतद्दोषदानात् प्रकारान्तरानुसरणेन परिष्कारे सकललक्षणानामेव परिष्कारसम्भवादिति ज्ञातं पल्लवितेन परे तु निर्धूमत्वव्याप्यतात्वेन साध्ये इत्यस्य सामानाधिकरण्यसम्बन्धावच्छिन्न-प्रतियोगिताक-धूमाभावव्याप्ये साध्ये तत् सम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावादौ अव्याप्तिरित्यर्थः। तत्र च हेतोरपि सकलसाध्याभाववदन्तर्गततया तत्र हेतुभेदासत्त्वेन न वह्न्यभावभेदमादाय लक्षणसङ्गतिरित्यव्याप्तिर्दुर्वारैव, तथाहि सामानाधिकरण्यसम्बन्धेन पर्वतत्वादौ वर्त्तमानस्य वह्नेस्तादृशसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य पर्वतादौ सत्त्वेन तत्र सामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताकधूमाभावासत्त्वात् साध्याभावाधिकरणत्वमविवादमेव इति ध्येयमित्याहुः।

साध्यवद्यक्तिविशेषमादाय व्याप्तिं परिहरति अत्रेति। साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वमिति साध्यतावच्छेदकविशिष्टसाध्यवत्त्वपर्य्याप्तावच्छेदकताकत्वमित्यर्थः। तेन वह्निमान् धूमादित्यादौ तत्तवह्निमत्त्वावच्छिन्नप्रतियोगिताकभेदमादाय न दोषस्तादृशप्रतियोगितावच्छेदकतायाः तत्ताविशिष्टवह्निमत्त्व एव पर्य्याप्तत्वात् व्युत्पत्तिबललभ्यम् अन्यादिपदसमभिव्याहारलभ्यं नञ्पदसमभिव्याहारज्ञानस्येव तादृशपदसमभिव्याहारज्ञानस्यापि अन्वयितावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावशाब्दत्वावच्छिन्नं प्रति एव जनकत्वादिति भावः। व्युत्पत्तिबललभ्यमित्यनेन यथाश्रुतलक्षणवाक्यार्थ एवायमिति सूचितम्। तादृशसमभिव्याहारस्थले तत्प्रतियोगिकाभाव-

मात्रबोधे अतिप्रसङ्गं सूचयति न हि भवतीति। प्रामाणिक-व्यवहार इति शेषः। तथाचान्वयिप्रतियोगिकाभावमात्र-बोधे नीलघटेऽपि पीतघटादिभेदसत्त्वेन तादृशव्यवहारोऽपि स्यादिति भावः द्रव्यं न घट इत्याद्यप्रयोगात् अन्वयि-तावच्छेदकावच्छेदेनान्योन्याभावादिरन्यादिपदेन प्रत्याय्यते अनुयोगितावच्छेदकस्य प्रतियोग्यवृत्तिरेव धर्म्म इति प्रकाश-कदङ्गीकृतव्युत्पत्त्यन्तवाधबोधात् घटोघटादन्य इति प्रयोग-वारणसम्भवाच्चेत्त इति घटादन्य इत्यादौ प्राचीनमते पञ्चम्याः प्रतियोगित्वमर्थः तत्र च प्रकृत्यर्थस्य घटत्वादिविशिष्टस्य घटत्वाद्यवच्छिन्नत्वविशिष्टाधेयतासम्बन्धेनान्वयः अथवा केवल-माधेयत्वमेव सम्बन्धः धर्म्मिपारतन्त्र्येण घटत्वादेरप्यवच्छिन्न-त्वसम्बन्धेनान्वयोपगमात् एकविशेषणत्वेनोपस्थितस्याप्यन्यत्र पारतन्त्र्येण अन्वयस्य व्युत्पत्तिसिद्धत्वात् प्रतियोगित्वस्य व्युत्पत्तिवैचित्र्येणान्यपदार्थैकदेशभेदे निरूपकतासम्बन्धेनान्वयः घटादन्य इत्यादौ निरूपकतासम्बन्धेन घटत्वावच्छिन्नप्रतियोगि-ताविशिष्टो लक्षणया घटादिपदार्थस्तत्पुरुषस्थले पूर्वपदस्य तत्तद्विभक्त्यन्तार्थविशिष्टलाक्षणिकत्वात् तादृशघटादिपदार्थ-स्याभेदसम्बन्धेन भेदेऽन्वयः नवीनमते च घटादन्य इत्यादौ अनुयोगित्वं पञ्चम्यर्थः तत्र च प्रकृत्यर्थस्य घटत्वादि-विशिष्टस्य स्ववृत्तिघटत्वाद्यवच्छिन्नानिरूपकताकत्वसम्बन्धेना-न्वयः अनुयोगितायाश्चाश्रयतासम्बन्धेन भेदेऽन्वयः समास-स्थले च घटत्वावच्छिन्ननिरूपितानुयोगिताविशिष्टे पूर्वपदस्य लक्षणा तस्य चाभेदसम्बन्धेन भेदेऽन्वयः अथैवं साध्यव-दन्यावृत्तित्वमित्येतादृशलक्षणवाक्यादभेदसम्बन्धेन तादृशप्रति-योगिताविशिष्टविशेषितस्तादृशानुयोगिताविशिष्टविशेषितो वा यो भेदस्तद्वदवृत्तित्वमेव प्रतीयते तथा च अनुमित्यौपयिक-

व्याप्तिस्वरूपजिज्ञासायां तादृशलक्षणाभिधाने अर्थान्तर-प्रसङ्गः तादृशप्रतियोगितासम्बन्धेन तादृशानुयोगितासम्बन्धेन वा साध्यवद्विशेषितभेदवदवृत्तित्वज्ञानस्यैव लाघवेन अनुमिति-हेतुत्वात् इति चेत् ? न, यादृशव्याप्तिज्ञानमनुमितिहेतुः तस्या-मेव अस्य तात्पर्य्यात् शाब्दबोधविषयत्वेऽपि तन्मूलकोदीच्य-व्याप्तिविषयकमानसोपनीतभानस्यैव तादृशतात्पर्य्यनिर्वाह्यत्वात् नीलोघटः कम्बुग्रीवादिमदन्य इत्यादिवाक्यस्य अप्रमाणत्वात् घटः कम्बुग्रीवादिमदन्य इत्यादि वाक्यस्य प्रमाणत्वादन्वयिता-वच्छेदकनिरूपितपारिभाषिकमवच्छिन्नत्वं प्रतियोगितानां भासते इत्युपेयम् अतः साध्यवदन्य इत्यादौ मतुबन्तप्रतिपाद्य-तावच्छेदकस्य साध्यसम्बन्धस्य साध्यापेक्षया गुरुतया अनव-च्छेदकत्वेऽपि नोक्तलक्षणवाक्यार्थाप्रसिद्धिः पारिभाषिकमव-च्छिन्नत्वञ्च तद्विशिष्टसम्बन्धिनिष्ठाभावीया या या प्रतियोगिता तदवच्छेदकत्वाभावकूटवदवच्छिन्नत्वम् एतादृशावच्छिन्नत्वस्य सम्बन्धतया प्रातिस्विकरूपेण तत्तत्प्रतियोगिताव्यक्तीनां दुर्ज्ञेय-त्वेऽपि न क्षतिः सम्बन्धज्ञानस्य विशिष्टबुद्धावनपेक्षितत्वात् अनु-मितिं प्रति च साध्यावच्छिन्नप्रतियोगिताकत्वावगाहिज्ञानमेव कारणं कल्प्यते लाघवात् न तु साध्यसम्बन्धावच्छिन्नप्रतियोगि-ताकत्वावगाहि ज्ञानम् अनुमित्यौपयिकव्याप्तिशरीरे तादृश्येव प्रतियोगिता निविश्यते कम्बुग्रीवादिमत्त्ववान् घटत्वादित्यादौ विशेषदर्शिनामनुमितेः प्रामाणिकत्वे निरुक्तपारिभाषिकाव-च्छिन्नत्वमेवानुमित्यौपयिकव्याप्तिघटकं तादृशगुरुधर्मावच्छिन्न-साध्यकानुमानस्य केवलान्वयिसाध्यकानुमानसमशीलतावादिनस्तु स्वरूपसम्बन्धरूपावच्छिन्नत्वमेव तादृशव्याप्तिशरीरे निवेशनी-यमिति समासः। मूले केवलान्वयिन्यभावादित्यादौ एतादृश-लक्षणपञ्चकस्य केवलान्वयिनि अप्रसिद्धेरित्यर्थः। न च हेतु-

तावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वस्यावश्यं निवेशनीयतया सत्तावान् द्रव्यत्वादित्यादौ अव्याप्तिरस्तीति केवलान्वयिसाध्यकमात्रे अव्याप्तिकथनमसङ्गतमिति वाच्यम्? केवलान्वयिपदेन हेतुतावच्छेदकसम्बन्धेन यत्किञ्चिदधिकरणवृत्त्यभावाप्रतियोगित्वरूपकेवलान्वयित्वाश्रयसाध्यकमात्रस्य उक्तत्वात् अथवा हेतुतावच्छेदकसम्बन्धेन वृत्तित्वमनिवेश्य हेतुतावच्छेदकसम्बन्धातिरिक्तो यो हेतुप्रतियोगिकः सम्बन्धः तदन्यसम्बन्धावच्छिन्नवृत्तित्वमेव निवेश्यं वह्निमान् धूमादित्यादौ कालिकसम्बन्धेन धूमादेः साध्याभाववद्वृत्तित्वाप्रसिद्धावपि हेतुतावच्छेदकसम्बन्धातिरिक्तत्वात् हेतुप्रतियोगिकत्वाच्च लक्षणाघटकतया तदन्यसम्बन्धेन तद्वृत्तित्वाभावः अस्त्येवेतिभावः। एवञ्च सत्तावान् द्रव्यत्वादित्यादौ हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वाप्रसिद्धावपि हेतुतावच्छेदकसम्बन्धातिरिक्तहेतुप्रतियोगिकसम्बन्धान्यविशेषणताविशेषादिना वृत्तित्वप्रसिद्ध्या नाव्याप्तिरिति ध्येयम्।

इति श्रीगदाधरतर्कालङ्कारविरचिता शिरोमणिकृतव्याप्तिपञ्चकव्याख्याया विवृतिः समाप्ता।

---

# अथ माथुरीटीकाया उत्तरसहिताः फक्किकाः।

## ननु तादृशवृत्तित्वसामान्याभाव इत्यस्य कोऽर्थः (१)

अत्रोच्यते स्वावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्य-नुयोगितावच्छेदक-रूपवृत्ति-यत् प्रतियोगित्वसम्बन्धावच्छिन्नावच्छेदकत्वं तद्भिन्ना सती या अभावत्वनिष्ठाव-

च्छेदकत्वभिन्नावच्छेदकता, तदनिरूपकं यदभावनिष्ठावच्छेदकत्वं तद्भिन्ना सती या अधिकरणत्वनिष्ठावच्छेदकत्वभिन्नावच्छेदकता तदनिरूपकं यदधिकरणनिष्ठावच्छेदकत्वं तद्भिन्ना सती या वृत्तितात्वनिष्ठावच्छेदकत्वभिन्नावच्छेदकता तदनिरूपकं यद्वृत्तित्वनिष्ठं प्रतियोगित्वं तन्निरूपकोऽभाव इति तदर्थः। महानसीयवह्निमान् धूमादित्यत्र वह्न्यभाववदवृत्तित्वमादायातिव्याप्तिवारणाय प्रतियोगित्वसम्बन्धावच्छिन्नावच्छेदकतायां तादृशसम्बन्धेन उक्तरूपवृत्तित्वं निवेशितम्। धूमवान् वह्नेरित्यत्र कूटवृत्तित्वविशिष्टधूमाभाववदवृत्तित्वमादायातिव्याप्तिभिया प्रथमनिरूपकान्तम्, धूमाभाववदृक्षदावृत्तित्वमादायातिव्याप्तिभिया द्वितीयमनिरूपकान्तमवच्छेदकताविशेषणं धूमाभाववद्वृत्तित्वजन्यत्वोभयाभावमादायातिव्याप्तिवारणाय च तृतीयमनिरूपकान्तं प्रतियोगिताविशेषणं बोध्यमिति ॥ १ ॥

साध्यतावच्छेदकसम्बन्धावच्छिन्नेत्यादि ।

ननु साध्यतावच्छेदकावच्छिन्नेत्यस्य साध्यतावच्छेदकेतरानवच्छिन्नार्थकतयैवोपपत्त्या किमत्र साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशेनेति चेन्न कालिकिनः स्वरूपसम्बन्धेन साध्यतायां गगनत्वादिहेतौ कालिकसम्बन्धेन कालिकिनोऽभावमादायाव्याप्तिवारणाय तस्यापि आवश्यकत्वात्। स्वनिरूपितसंसर्गानवच्छिन्नावच्छेदकतात्वावच्छिन्न-प्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गानवच्छिन्नावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रतियोगिताकोऽभाव इति तदर्थः। अन्यथा समवायसंयोगोभयसम्बन्धेन द्रव्यसाध्यके द्रव्यत्वहेतौ संयोगेन द्रव्याभाववदवृत्तित्वमादायातिव्याप्तेरिति। समवायिनः संयोगेन साध्यतायां समवायेन संयोगिनोऽभावमादायाव्याप्तिवारणाय

साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वविशेषणं केचित् सार्थकयन्ति तत् न मनोरमम्। तादृशाभावस्य साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकताकत्वविरहात्। कालिकेन प्रमेयत्वविशिष्टस्य समवायेन साध्यत्वे घटत्वादिहेतौ विषयितासम्बन्धेन प्रमेयत्वविशिष्टं यत् तदभावमादायाव्याप्तिवारणाय तस्यापि अत्र अवश्यनिवेश्यत्वादिति ॥ २ ॥

किमत्र प्रतियोगितापदमिति चेत्।

अभावत्वप्रकारकप्रमाविशेष्यमभावत्वादित्यत्र अधिकरणस्याधेयता निरूपकतायामविवादेन साध्यनिष्ठाधेयतानिरूपको यो घटाद्यभावस्तद्वति पटाद्यभावे हेतोस्तैरव्याप्तिवारणाय तस्य आवश्यकत्वात् ॥३॥

अभावत्वरूपानुयोगितायां अपि निरुक्तप्रतियोगिताजातया तत्रैवाव्याप्तिवारणायाभावपदमपि। इत्थञ्च निरुक्तप्रतियोगिताकत्वाभावत्वरूपधर्मद्वयावच्छिन्नाधिकरणताया अभावेऽसत्त्वात् न तत्राव्याप्तिरिति ॥४॥

ननु साध्याभावाधिकरणनिरूपितस्याभावनिवेशेनैवोपपत्तौ किं तादृशवृत्तित्वाभावनिवेशेनेति चेत्, न।

तन्निरूपितप्रतियोगितायां हेतौ सत्वेन च तथा सति हेत्वभावस्यापि साध्याभावाधिकरणतया वह्निमान् धूमादित्यादावव्याप्त्यापत्तेः। यदि च अग्रे विवक्षणीयेन हेतुतावच्छेदकसम्बन्धावच्छिन्नाधेयता प्रतियोगिकविशेषणताविशेषसम्बन्धेन साध्याभावाधिकरणनिरूपितस्य अभावो निवेश्यः अभावीयप्रतियोगिता च न ईदृशसम्बन्धेन वर्त्तते इति न अव्याप्तिरिति उच्यते। तदापि संसर्गीयप्रतियोगित्वमेव तत् संसर्गावच्छिन्नवृत्तित्वं न ततो भिन्नमिति मते हेतुतावच्छेदकसम्बन्धस्यापि

साध्याभावाधिकरणतया तदीयप्रतियोगित्वस्य च निरुक्तसम्बन्धेन हेतौ सत्त्वात् तत्रैव अव्याप्तेः। यदि च वृत्तितात्वावच्छिन्नप्रतियोगिताकस्वरूपसम्बन्धेन साध्याभावाधिकरणनिरूपितत्वावच्छिन्नं न तत्र वर्त्तते इति न अव्याप्तिरित्युच्यते तदा तु व्यभिचारिमात्र एवातिव्याप्तिस्तादृशवृत्तितात्वावच्छिन्नप्रतियोगिताकस्वरूपसम्बन्धेन तादृशनिरूपितत्वावच्छिन्नस्य सर्वत्रैव अभावादिति ॥५॥

अथात्र लक्षणे वह्निमान् धूमादित्यादावव्याप्तिः हेत्वधिकरणताया अपि साध्याभावाधिकरणत्वात्
हेतुनिष्ठवृत्तितायाश्च तत्
निरूपितत्वादिति ।

न च हेत्वधिकरणताभिन्नत्वेन साध्याभावाधिकरणं विशेषणीयमिति वाच्यम्? तथा सति धूमाधिकरणताभिन्नं धूमादित्यत्र हेत्वधिकरणताभिन्नायाः साध्याभावाधिकरणताया अप्रसिद्धा अव्याप्तेः। न च साध्याभावाधिकरणनिष्ठाधिकरणतानिरूपितवृत्तित्वाभावो विवक्षित इति वाच्यम्? तथा सति धूमाधिकरणभिन्नं धूमाधिकरणतात्वादित्यत्र अव्याप्तेरिति चेत्? न, स्वनिरूपितत्वस्वनिष्ठाधिकरणतानिरूपितत्वम् एतदुभयसम्बन्धेन साध्याभावाधिकरणविशिष्टवृत्तित्वाभावस्य विवक्षितत्वात् स्वं साध्याभावाधिकरणमिति। यदि च एवमपि घटाभावाधिकरणतात्वप्रकारकप्रमाविशेष्यं घटाभावाधिकरणतात्वादित्यत्र अव्याप्तिः स्वपदेन घटाभावाधिकरणतात्वनिरूपिताधिकरणतायाः स्वनिष्ठाधिकरणतापदेन च तन्निष्ठघटाभावाधिकरणताया धर्त्तुं शक्यत्वादिनिष्ठाधिकरणतायाः स्वानधिकरणत्वेन विशेषणीयत्वे च वाच्यत्वभिन्नं घटत्वादित्यत्र अव्याप्तेरित्युच्यते तदा तादृशोभयसम्बन्धघटकं स्वनिष्ठाधिकरणत्वं स्वाभाववत्त्वे-

नैव विशेषणीयं स्वाभावस्य अव्याप्यत्वस्वाश्रयत्व एतदुभयसम्बन्धावच्छिन्नप्रतियोगिताकत्वेन विशेष्य इति वाच्यत्वादेर्व्यधिकरणेन तादृशसम्बन्धेन अभावस्य प्रसिद्धत्वात् न कोऽपि दोष इति। परमार्थतस्तु निरूपितत्वसम्बन्धेन साध्याभावाधिकरणविशिष्टं यद्वृत्तित्वं तदभावो निवेश्यः निरूपितत्वञ्च विशिष्टप्रतीत्यनुरोधात् कुत्रचिदेव वृत्तितायां कस्यचित् सम्बन्धो न तु सर्वेषां सर्वत्र एवञ्च धूमाधिकरणतायां धूम इत्यप्रत्ययात् न काप्यनुपपत्तिरित्यस्मद्गुरुचरणाः। केचित्तु अधिकरणताधिकरणस्वरूपा इति न दोष इति वदन्ति तत् न मनोरमं तथा सति तुल्ययुक्त्या आधेयत्वस्य अपि आधेयस्वरूपतया हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणतानिरूपितहेतुतावच्छेदक-सम्बन्धावच्छिन्नाधेयताप्रतियोगिकविशेषणताविशेषसम्बन्धेन साध्याभावाधिकरणनिरूपितवृत्तित्वाभावस्य निवेशेऽपि द्रव्यं विशिष्टसत्त्वादित्यत्र अव्याप्तेर्वारयितुमशक्यत्वादिति ॥६॥

ननु तथापि गुणत्ववान् ज्ञानत्वात् सत्तावान् जातेरित्यादि।

ननु अत्र कालिकसम्बन्धेन तद्घटिताव्याप्यत्वसम्बन्धेन च पर्वतादेर्ज्ञानादेश्च साध्याभावाधिकरणतया वह्निमान् धूमादिति प्रसिद्धस्थलं गुणत्ववान् ज्ञानत्वादिति पूर्वोक्तस्थलञ्च कथं परित्यक्तमिति चेत्? न, जन्यमात्रस्य कालोपाधिमङ्गीकर्त्तृमते तत्र तत्र अव्याप्तिविरहात्। सत्तावान् जातेरित्यस्यापि प्रसिद्धस्थलत्वाच्च ॥७॥

स्वानिरूपकसाध्यकाभिन्नत्वमित्यस्य। साध्यानिष्ठभेदीयप्रतियोगिताया निरूपकत्वनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वाभाववत्त्वमर्थः ॥८॥

साध्यतावच्छेदकसंवन्धेन वर्त्तते यत् साध्यं तन्निरूपितप्रति-

योगितानिवेशे समवायेन प्रमेयसाध्यके सामान्यपदव्यावृत्त्य-भावाविषयितादिसंबन्धेन तत् साध्यानुधावनमिति ॥९॥

कालिकसंबन्धावच्छिन्नात्मत्वप्रकारकप्रमाविशेष्यत्वाभाववान् आत्मत्वादित्यादिसाध्यीयप्रतियोगितावच्छेदकसंबन्धेन तादृश-संबन्धावच्छिन्नप्रतियोगित्वाश्रयीभूतस्य साध्याभावस्य अधि-करणेऽवर्त्तमानत्वं व्याप्तिरित्युक्तौ विशेष्यत्वाभावसाध्यके व्यावृ-त्त्यभावादात्मत्वप्रकारकेत्यादि । प्रमापदमप्यत एव अन्यथा आत्मत्वप्रकारकज्ञानविशेष्यत्वस्यापि केवलान्वयितया स्वरूप-संबन्धावच्छिन्नत्वप्रतियोगित्वानधिकरणतया धर्त्तुमशक्यत्वा-दिति ॥१०॥११॥

अतैव पूर्वक्षणादिवृत्तित्वविशिष्टसाध्याभावमादाय व्याप्ति-भिया साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वेन अभावो विशेषित इति ॥१२॥

अत्र प्रतियोगितापदमप्यत एव अन्यथा कालिकसंबन्धाव-च्छिन्नसाध्यावच्छिन्नस्यापि साध्यनिष्ठनिरुक्तविशेषणाक्रान्तवृत्ति-तानिरूपकतयाऽव्याप्तितादवस्थ्यात् ॥१३॥

अनुयोगितायाः कालिकसम्बन्धावच्छिन्नाभावे कालिक-सम्बन्धेन साध्ये महाकालत्वेनाव्याप्तिवारणायाभावपदम-न्यथा निरुक्तविशेषणाक्रान्त साध्यनिष्ठप्रतियोगिताया निरूपकं यदभावत्वरूपानुयोगित्वं तत्रापि अनुयोगितात्वावच्छिन्नायाः साध्यीयप्रतियोगितायाः सत्त्वेन तदवच्छेदककालिकसम्बन्धेन महाकालस्यापि साध्याभावाधिकरणत्वात् ॥१४॥

साध्याभावनिष्ठं यत्कालिकादिसम्बन्धावच्छिन्नं साध्यानि-रूपितवृत्तित्वं तदवच्छेदककालिकादिसम्बन्धेन साध्याभाववति पर्वतादौ हेतोः सत्त्वाद्वह्निमान् धूमादित्यादावव्याप्तिवारणायाऽ-न्तिमं प्रतियोगितापदमिति ॥१५॥

नन्वत्र कालिकसम्बन्धावच्छिन्नाधिकरणतायां निरवच्छिन्नत्वविरहात्तथाप्यव्याप्तिः स्थास्यति कथमत्र व्यावृत्तिसङ्गतिरिति चेत् ? न, कालिकान्यसम्बन्धावच्छिन्नीयत्वस्य किञ्चिदवच्छिन्नत्वस्य च द्वयोर्व्यतिरेकस्यैव निरवच्छिन्नपदेन विवक्षितत्वादिति ॥१६॥

नन्वत्र लक्षणे घटभिन्नं कपालत्वादित्यत्र गुणभिन्नं द्रव्यत्वाव्याप्तिघटत्वगुणत्वादिनिष्ठात्यन्ताभावत्व-निरूपितप्रतियोगितावच्छेदकसमवायसम्बन्धेन घटरूपगुणादिसाध्यकस्य कपाले द्रव्ये च सत्त्वादिति म च साध्यीयप्रतियोगिताविशिष्टनिरूपकताकाधिकरणत्वं वक्तव्यं वैशिष्ट्यञ्च स्वावच्छेदकसम्बन्धावच्छिन्नत्वस्वसामानाधिकरण्ये तदुभयसम्बन्धेनेति वाच्यं ? तथा सति अत्यन्ताभावनिरूपितत्वविशेषणवैयर्थ्यापत्तेः । अत्र केचित्तल्लाभायैव तदुपादानमिति वदन्ति । वस्तुतस्तु लक्षणोक्तसाध्याभावेऽपि साध्यनिष्ठात्यन्ताभावत्वनिरूपितप्रतियोगित्वाश्रयत्वविशेषणमस्तीति न कोऽपि दोषः पदमादधाति ॥१७॥

उभयत्वमुभयत्रैव पर्य्याप्तमित्यादि ।

नन्वेवमपि द्रव्यं घटत्वपटत्वोभयस्मादित्यादावतिव्याप्तिः साध्याभाववति गुणादौ तदुभयोरवृत्तेस्तथा घटे घटत्वस्य पटे च पटत्वस्य साध्यसमानाधिकरणत्वात् । न च हेतुतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यमेव वाच्यमित्युभयत्वावच्छिन्नस्य कुत्राप्यवृत्त्या नातिव्याप्तिरिति वाच्यं ? तथा सति हेत्ववच्छेदकभेदेनानन्तकार्य्यकारणभावतादवस्थ्यादिति चेत् ? न, तादृशसामानाधिकरण्यविशिष्टहेतुतैव व्याप्तिः वैशिष्ट्यञ्च स्वावच्छेदकसम्बन्धावच्छिन्नत्वस्वसामानाधिकरण्यस्वानवच्छेदकानवच्छिन्नत्वस्ववृत्तित्व एतत्चतुष्टयसम्बन्धेन, स्ववृत्तित्वमपि स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन बोध्यमित्यदोषः ॥१८॥

अन्ये तु हेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुतावच्छेदकावच्छिन्नस्वाधिकरणताश्रयवृत्ति यत् निरवच्छिन्नाधिकरणत्वमित्यादि।

नन्वत्र तादृशहेत्वधिकरणनिरवच्छिन्नवृत्तितानवच्छेदकनिरुक्तसाध्याभावत्वकत्वमित्युक्तौ को दोषः। मैवं तथा सति द्रव्यत्वाभाववान् जातित्वादित्यादौ निरुक्तसम्बन्धावच्छिन्नहेत्वधिकरणवृत्तित्वाप्रसिद्ध्याऽव्याप्तिप्रसङ्गात्। न च तथापि तादृशहेत्वधिकरणनिरवच्छिन्नावृत्तिनिरुक्तसाध्याभावत्वावच्छिन्नाधिकरणताकत्वमेव व्याप्तिरस्त्विति वाच्यम्? अधिकरणभेदेनैवाधिकरणताभेदात्स्थलादिनिष्ठाधिकरणताव्यक्तेरेव हेतुमत्यवृत्त्या धूमवान् वह्नेरित्यादावतिव्याप्तेः। न च तथापि तादृशहेत्वधिकरणनिरवच्छिन्नवृत्तितानवच्छेदकनिरुक्तसाध्याभावत्वावच्छिन्नाधिकरणतात्वकत्वमेव निवेश्यमितिवाच्यं तथा सति धूमाभावाधिकरणतात्वस्य वह्निमद्वृत्तिताया अतिप्रसक्तत्वेनानवच्छेदकतया धूमवान् वह्नेरित्यत्रैवातिव्याप्तितादवस्थ्यादित्येतावान् प्रयासः ॥१८॥

घटत्वघटाकाशसंयोगान्यतराभाववान् गगनत्वादिति।

घटाकाशसंयोगाभावस्य केवलान्वयितया तत्साध्यकाव्याप्तेरिदानीमनौचित्यादाह घटत्वेति आकाशसंयोगाभावस्याकाशे विरहात् घटेत्यादि घटानुयोगिकसंयोगमात्रस्य तत्र घटकत्वे तस्याकाशेऽसत्त्वेनाव्याप्तिविरहात् घटप्रतियोगिकाकाशानुयोगिकसंयोगस्य घटकतालाभायाकाशेति।

नन्वेवमपि घटत्वतद्घटाकाशसंयोगान्यतराभाववान् गगनत्वादित्यत्राव्याप्तिः साध्यवच्छिन्ने घटे वर्त्तमानस्य तत् संयोगात्मकसाध्याभावस्य गगनेऽपि सत्त्वादिति चेत् न। यतस्तादृशान्य-

तरभावत्वावच्छिन्नाभावो न तादृशान्यतरस्वरूपस्तथा सति तत्-संयोगे स्वप्रतियोगिसमानाधिकरणत्वतदभावयोरध्यासात् किन्तु ततो भिन्नं घटे गगने च द्वयमेवेति न तत्राव्याप्तिरिति। न च भावस्याप्यभावाभावत्वकल्पने तादृशाध्यासस्य प्रतिरोधकत्वे तत्-संयोगाभावाभावत्वमपि तस्य न स्यात्तत्रापि तादृशाध्यासस्सम्भवा-दिति वाच्यं? तत्र तादृशाध्यासस्यैवासम्भवात्तथा हि अध्यासः प्रसङ्ग आपत्तिरिति यावत् सा च तत्र स्वप्रतियोगिसमानाधिकरणत्वतद-भावोभयवान् स्यादित्याकारिका तदुभयस्य कुत्राप्यवृत्त्या तादृशो-भयनिरूपितव्याप्त्यप्रसिद्ध्या आपाद्यव्याप्यापादकालाभेनैव न सम्भ-वितुमर्हतीति अतिरिक्ताभावद्वयाकल्पनप्रयुक्तलाघवेन तत् संयोग-स्वरूपत्वमेव तस्य कल्प्यते। तादृशान्यतराभावत्वाच्छिन्नभावस्त्व-तिरिक्त एवोक्तयुक्तेः। तत्संयोगाभावादेस्त्वेकत्वे स्वप्रतियोगिस-मानाधिकरणत्व तदभावयोरापाद्ययोर्व्याप्यस्य तत्संयोगाभावादौ सत्त्वाद्भवत्यापत्तिरित्यधिकरणभेदेन भिद्यत एव स इति। यद्वा क्लृप्तयोर्घटत्व तत्संयोगानुयोगित्वयोरेव तादृशान्यतराभावा-भावत्वं कल्प्यते। न चैवं विनिगमनाविरहेण घटत्व तत्संयोगयो-रपि तत्त्वं सिध्येदिति वाच्यं? तथा सति घटत्वविशिष्ट तत्-संयोगत्वावच्छिन्नीयस्य गगनत्वविशिष्ट तत्संयोगत्वावच्छिन्नी-यस्य चाधिकरणताद्वयस्याङ्गीकारावश्यकत्वादन्यथा घटवृत्ति-तद्वद्गगनवृत्तितद्वान् घट इत्यादि प्रत्ययापत्तेः। मम तु व्यक्त्योरेव अभिन्नतया उपलक्षणत्वेन भानेऽपि क्षतिविरहादित्यस्मद्गुरु-चरणानां परैव परिशीलितः पन्थाः॥ २०॥

यत्र प्रतियोगिसमानाधिकरणेत्यादि।

ननु अत्र प्रतियोगिसमानाधिकरणत्वमेवाभावभेदसाधकमस्तु किं तादृशविरुद्धधर्माध्यासस्य तथात्वेन इति चेत्? न, प्रति-समानाधिकरणत्वं मात्रं नाश्रयभेदसाधकं तस्य तथात्वेऽपि प्रति-

योगिमतिवर्त्तते या अभावव्यक्तिस्तत्र प्रतियोगिसमानाधिकरण-त्वस्य भवतामप्यावश्यकत्वात्। तस्मात्तादृशविरुद्धधर्माध्यास एव तथा स चाध्यास: कपिसंयोगाभावो यद्येक: स्यात्तदा प्रतियोगि-समानाधिकरणत्वप्रतियोगिव्यधिकरणत्वोभयं विरुद्धं न स्यादि-त्याकारकस्तदुभयमेकत्र स्यादित्याकारक: स तादृशोभयवान् स्यादित्याकारको वेत्यन्यदेतदिति ॥ २१ ॥

तृतीयलक्षणे प्रतियोग्यवृत्तित्वेन विशेषणीय इति ।

न चैवं सर्वत्रासम्भव: भेदमात्रस्य प्रतियोगितावच्छेदकरूप-प्रतियोगिवृत्तित्वादिति अन्योऽन्याभावत्वनिरूपितप्रतियोगित्वा-श्रयावृत्तित्वनिवेशे तु लक्षणस्यान्योऽन्याभावपदवैयर्थ्यमभाव-निवेशेनैवोपपत्तेरिति चेत्? न, तन्नाभार्थमेव तस्योपादाना-दिति ॥ २२ ॥

न चात्र प्रतियोग्यवृत्तित्वमपहाय साध्यवदवृत्तित्वमेवोच्यतां तथा च पञ्चलक्षणाभेदस्यापि वारयितुं शक्यत्वादिति वाच्यम्? अन्योऽन्याभावपदवैयर्थ्यापत्तेरिति ॥ २३ ॥

चतुर्थलक्षणे तद्वत् निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकं हेतुतावच्छेदकसम्बन्धावच्छिन्नयद्धर्मावच्छिन्ना-भावत्वमिति ।

अत्र तद्वत् निष्ठत्वभावस्य न सम्बन्धसामान्येन धूमाभावा-भावस्यापि कालिकादिकसम्बन्धेन साध्याभाववति वृत्त्या वह्निमान् धूमादित्यादावव्याप्त्यापत्ते: । न वा हेतुताघटकसम्बन्धेन सत्ता-वान् द्रव्यत्वादित्यादौ तादृशसम्बन्धेन साध्याभाववति वृत्तेर-प्रसिद्ध्या अव्याप्त्यापत्ते: । किन्तु स्वप्रतियोगितावच्छेदकसम्ब-न्धेन स्वप्रतियोगिमत्त्वबुद्धेर्विषयविधयाप्रतिबन्धकतावच्छेदको य: सम्बन्धस्तेनैव सम्बन्धेनेति तत्त्वम् ॥ २४ ॥

नतु तथापि धूमाभावाभावसंयोगसम्बन्धावच्छिन्नधूमाभावाभावात्मकस्य धूमस्य धूमाभाववति धूमावयवे समवायेन वृत्त्या वह्निमान् धूमादित्यत्राव्याप्तिरिति चेत्? न, तादृशसाध्याभावाधिकरणवृत्तितावच्छेदकानुयोगितानिरूपित-प्रतियोगितानवच्छेदकं हेतुतावच्छेदकसम्बन्धावच्छिन्न यद्धूमावच्छिन्नभावत्वं तद्धर्मवत्तस्य विवक्षितत्वात्। संयोगसम्बन्धावच्छिन्नधूमाभावाभावत्वं तत्-सम्बन्धावच्छिन्नवृत्तिताया एवावच्छेदकं न तु सम्बन्धान्तरावच्छिन्नवृत्तिताया धूमस्य तत्संबन्धेनैव तदभावाभावत्वसिद्धेरिति आस्तां विस्तरः॥ २५॥

... OF ADVANCED STUDY
Acc. No 25863
Date 20.3.68